॥१॥
नवकंडिका

॥श्रीगणेशाय नमः॥ शिवं च विष्णुं हरिं गुरूंश्च वामनं नत्वा॥ अंबिकां शारदां च
पितॄन्देवि द्विजोपकारतः ये॥१॥ कात्यायनेन कृते श्राद्धसूत्रे व्याख्या पुरःसरं॥ प्रयोगपद्ध
तिं कुर्वे याज्ञवल्क्यादिसंमतां॥२॥ तत्र पूर्वां पौर्णमासीमुत्तरां वोपवसेदि
त्यादिना श्रौतकर्माण्युपदिश्याऽथातो गृह्यस्थालीपाकानां कर्मेत्यादिना स्मा
र्तान्व्याख्यायाऽवशिष्टं श्राद्धकर्म वक्तव्यमित्यत आह॥ अपरपक्षे श्राद्धं कुर्वी
त॥ श्राद्धमिति कर्मणो नामधेयं॥ तत्र कर्मणि पिंडदानस्यैव श्राद्धमिति
नामधेयं॥ तत्र च पिंडदानाकरणे प्रयोगवृत्तिः॥ पिंडदान ब्राह्मणभोजना
ग्नौकरणीत्रयाणां कर्मणां समुदायस्येत्यन्ये॥ श्राद्धशब्दः स्मृतिरुक्तो ब्रह्मां
डे॥ देशे काले च पात्रे च श्रद्धया विधिना च यत्॥ पितॄनुद्दिश्य विप्रेभ्यो दत्तं
श्राद्धमुदाहृतमिति॥ अपरपक्ष इति कृष्णपक्ष उच्यते॥ समाचारात्॥ समा
ंतिहि कृष्णपक्षे श्राद्धमिति लिंगाच्च॥ योऽपक्षीयते स पितर इति॥ अत्र पक्ष

या
नं
१
र

॥१॥
॥भाष्य॥

पि समस्तमाससंबंध्यपरपक्षस्य श्राद्धकालत्वं प्रतीयते॥ तथापि स्मृत्यंतरे
दर्शनात् कन्याकुंभसंबंधिनो विशिष्टत्वं॥ तत्रापि कन्यासंबंधिनः पुण्यत
मत्वं॥ तथा च मनुः॥ अनेन विधिना श्राद्धं त्रिरब्दस्येह निर्वपेत्॥ हेमंतग्री
ष्मवर्षासु पांचयज्ञियमन्वहं॥ ऋतुपक्षे या हेमंतग्रीष्मवर्षास्विति यदुक्तं
तद्विवेचितं मत्स्यपुराणे॥ अनेन विधिना [illegible] श्राद्धं त्रिरब्दस्येह निर्वपे
त्॥ कन्याकुंभवृषस्थेऽर्के कृष्णपक्षेषु सर्वदा॥ कन्यासंबंधिनस्तु पक्षे
यं विशेषः॥ तस्योऽभयथा संकीर्तनमस्ति॥ क्वापि प्रोष्ठपदापरपक्षे
त्वेन क्वाप्याश्वयुक्कृष्णपक्षत्वेन॥ तथा च विष्णुधर्मोत्तरे मार्कंडेयः॥ उ
त्तरायणतः श्राद्धं श्रेष्ठं स्याद्दक्षिणायने॥ चातुर्मास्ये च तत्रापि प्रसुप्ते केशवे हि
तं॥ प्रोष्ठपद्यापरपक्षे तत्रापि च विशेषः॥ पंचम्यूर्ध्वं ततश्चापि दशम्यूर्ध्वं त
तोप्यति॥ शस्ता त्रयोदशी राजन्नमावास्या ततोऽधिका॥ शंखेनाप्युक्तं॥ प्रोष्ठ

॥२॥ नव०

पक्षौ युक्तं त्रयोदशीं प्राप्य श्राद्धं हि कर्तव्यं मधुना पायसेन तु ॥ ब्रह्मपुराणे ॥
आश्वयुक्कृष्णपक्षस्य श्राद्धं कार्यं दिने दिने ॥ त्रिभागहीनं पक्षं वा त्रिभागं
त्वर्द्धमेव वा ॥ आश्वयुज्यां च कृष्णायां त्रयोदश्यां मघासु च ॥ प्रावृड्ऋतौ यम
प्रेतानां पितॄंश्चापि यमालयमिति ॥ त्रिभागहीनमिति प्रतिपदादिचतुष्टयं ॥
चतुर्दशीं विहाय पञ्चम्यादि पक्षशेषे ॥ त्रिभागमिति षष्ठ्यन्तीय भागं ॥
अनेन दशम्यादिकृत्ये ॥ अर्द्धमित्यष्टम्यादि यथाशक्ति कुर्यादपरपक्ष
कमिति प्राच्यास्तु ॥ पंचम्यूर्ध्वं चेत त्रापि दशम्यूर्ध्वं तत्रोप्यतीति विष्णुव
मौत्तरवाक्ये कवाक्यत्वाया त्रिभागहीनं षष्ठ्यादि विभागमेकादश्यादावाहु ॥

६ ग

पत्तु तैरर्धमित्यस्य तत्तीयभागार्धं त्रयोदश्यादावेवं व्याख्यानं मूलं मतस्त्व ॥२॥
मित्यस्यानन्वयदोषापत्तेरुपेक्ष्यमिति कमलाकरभट्टाः ॥ कुवृत्ते तिविचाय ॥भाष्य॥
कपदं ॥ अथेदानीं विचार्यते ॥ किं श्राद्धं साग्निकस्यैवाधिकार उत निरग्नि

कस्याप्यंगत्वं कर्माचार्येण निर्णीतं ॥ अग्नौकरणोपरूपस्यांगस्यांगत्वाधिकर
णत्वात्तदुपसंहारे साग्निकस्यैवराच्छित्तैत्तरस्य ॥ नपैतृयज्ञियो होमो लौकि
केग्नौ विधीयत इति निषेधात् ॥ अत्र च दारसंग्रहपूर्वकं कर्माव सथ्याधा
नंतत्पूर्वं विकाच कर्मांतरे प्रवृत्तिरियत्तोपि नानग्निमतोधिकार इति ॥ प
दत्तं ॥ अन्यथा वेत्तु विप्रस्य पाणा वेवोपपादयेदिति ॥ तदपाकृतावसथ्या
भ्युदयिकविषयं ॥ अनग्निमतोपि श्राद्धाधिकारस्यैवं विधा प्रसिद्धिस्तु दृह
वेदेव्यक्षो वसतीति वदने निश्चितमस्तेति नानग्निमतः श्राद्धाधिकारे प्र
माणमिति ॥ तदिदमनुपपन्नं ॥ नित्यनैमित्तिकेषु हि पर्याराङ्कुर्यात्तपार्कु
सं र्यादिति न्यायात्सर्वांगोपसंहारात्स्याप्यधिकारात् ॥ अन्यथा वेतु पाणौ
होमविधानात् ॥ अस्य विधानस्य चोक्त विषयविशेषव्यवस्थापकः प्रमा
णत्वाभावात् ॥ संति चाग्नौकरणरहितानि श्राद्धानि तेष्वधिकाराभावतेषु ॥

६

॥३॥
नव०

स्त्रीशूद्रानुपनीतानामपिश्राद्धोपदेशात्ससाग्निकानग्निकोभयाधिकारे
णविहितंश्राद्धमितिसिद्धमितिहेमाद्रिः॥ अपरपक्षेप्रतिपत्प्रभृतिदर्शां
तेप्रत्यहंकर्त्तव्यमित्युक्त्वाऽधुनापक्षांतरमाह॥ ॥पूर्वेवाचतुर्थ्याः॥वा
शब्दोविकल्पार्थः॥चतुर्थ्याःपूर्वेउत्तरश्चालेपंचमीप्रभृतिवाकुर्यात्॥
तदुक्तंगौतमेन॥अथश्राद्धममावास्यायांपंचमीप्रभृतिवाऽपरप
क्षस्येति॥मनुस्मृतौविशेषः॥कृष्णपक्षेदशम्यादौवर्जयित्वाचतुर्द
शीं॥श्राद्धेप्रशस्तास्तिथयोयथैता।नतथेतराइति॥तिथिविशे
षकंपक्षांतरमाह॥यदहःसंपद्येततदहर्ब्राह्मणानामंत्र्यपूर्वेद्युर्वा॥
तत्रचतुर्दशींविनासर्वासुतिथिषुपंचम्यादिषुवायदहर्यस्मिन्नह
निद्रव्यब्राह्मणयोःसंपत्तिस्यात्तदहस्तस्मिन्नहनियथोदितान्ब्राह्म

॥३॥
कां०

णानामंत्र्य श्राद्धं कुर्यात्॥ अथवा पद्दिनेमताहं संक्षिप्तातिथिरपरपक्षे
स्यात्तदहेः पूर्वेद्युर्वा ब्राह्मणानामंत्र्य श्राद्धं कुर्यादिति संबंधः॥ तथा च पु
राणसमुच्चये॥ यातिथिर्यस्य मासस्य मृताहे तु प्रवर्त्तते॥ सा तिथिः प्रेतप
क्षस्य पूजनीया प्रयत्नतः॥ इति॥ यद्दहरिति विभक्त्यर्थे व्ययीभावः॥ न
पुंसकादन्यतरस्यामिति च प्रत्ययः॥ ब्राह्मणग्रहणं क्षत्रियादिप्रतिषेधा
र्थं॥ पूर्वेद्युर्वेति व्यवस्थितविकल्पः॥ असंभावितमिथुनानां यत्यादीस्तदहरामं
त्रयेत्॥ अंगानां प्रधानधर्मत्वादिति न्यायेन संभावितमिथुनानां पूर्वेद्युरेवेति व्य
वस्था॥ एतच्च व्यक्तीकृतं मार्कंडेयपुराणे॥ निमंत्रयेत्तु पूर्वेद्युः पूर्वोक्तांस्तु द्विजोत्तमान्॥
अप्राप्तौ तद्दिने वापि हित्वा योषित्प्रसंगिनम्॥ इति॥ प्रार्थयीत प्रदोषांते तु
क्तान्यपि तान्द्विजान्॥ सर्वायासविनिर्मुक्तैः कामक्रोधविवर्जितैः॥ भवित
व्यं भवद्भिश्च योभूतो श्राद्धकर्मणि॥ अयुग्मान् प्रयत्नेन पित्र्ये पूर्वं निमंत्रयेत् इति

पितृपूर्वकं निमंत्रणं त्वन्यशाखाविषयं॥ कात्यायनमतानुवर्तिनां देवानां निमंत्रणं पूर्वं
दैवपूर्वं श्राद्धमिति वक्ष्यमाणत्वात् पितृपूर्वं निमंत्रणमिति श्राद्धकाशिकाकारः॥
॥नव॥ मात्स्ये विशेषः॥ दक्षिणं जानुमालभ्य त्वं मयात्र निमंत्रितः॥ एवं निमंत्र्य नियमान्
श्रावयेत्पैतृकान्बुधः इति॥ राजन्यवैश्ययोश्च पुरोहितादिर्निमंत्रणं कुर्यात्॥
ऋत्विग्राजन्यवैश्ययोरिति वचनात्॥ प्रतिदिनमपरपक्षश्राद्धकरणे स्मृत्यंतरो
॥४॥ क्ततिथ्यादिदोषो नास्ति॥ तथाच कार्ष्णाजिनिः॥ नभस्यापरपक्षे तु श्राद्धं कार्यं
दिने दिने॥ नैव नंदादि वर्ज्यं स्यान्नैव निंद्या चतुर्दशी॥ दशम्यादिपक्षत्रये तु चतु ॥भाष्य॥
र्दशी वर्जनीया॥ कृष्णपक्षे दशम्यादावित्यादिवचनं प्रागुक्तं॥ स्नातकान्॥
आमंत्र्य श्राद्धं कुर्यादिति शेषः॥ तपःस्नातकाभवंतीत्यादिना स्नातकलक्षणं चो ॥८॥
क्तं कात्यायनेन॥ अयं च पत्नीकनिमंत्रणप्रतिषेधप्रतिप्रसवः॥ विभार्यो विषक्ती
षतिरिस्सत्रिंशणं निषिद्धत्वात्॥ एके यतीन्॥ निमंत्रयंति॥ तदुक्तं॥ संप्रजये पाति

श्राद्धे पितृणां पुष्टिकारकं ॥ ब्रह्मचारी यतिश्चैव प्रजनीयो हि नित्यशः ॥ न कृतं सुकृ
तं यत्स्यात्तस्य षड्भागमाप्नुयात् ॥ मार्कंडेयोपि ॥ भिक्षार्थमागतान्वापि काले संय
मितो यतीन् ॥ भोजयेत्प्रणिपाताद्यैस्तु प्रसादोद्यतमानस इति ॥ यतिस्तु त्रिदंडी ॥ एक
दंडीनां श्राद्धे निरस्तत्वात् ॥ तथाह ॥ मंडीजुष्टिलकापायान् श्राद्धे यत्नेन वर्जयेत् ॥
शिखिभ्यो धातुरक्तेभ्यस्त्रिदंडिभ्यः प्रदापयेत् ॥ यतिं कुटीचरं बहूदकं च ॥ इतर
योः कलौ निषिद्धत्वात् ॥ तथा हि ॥ दीर्घकालं ब्रह्मचर्यं वानप्रस्थाश्रमं तथा ॥ हं
सः परमहंसश्च कलौ नैतच्चतुष्टयमिति ॥ गृहस्थानां साधनं च ॥ यास्त्राद्धो बि
ल्वार्थः ॥ पाक्षिकयतीनां निमंत्रणे निषेध्यार्थे यात्राबद इति केचित् ॥ तथा रजाबालिः
अश्नंति ये न मांसानि भार्याहीनाश्च ये द्विजाः ॥ ये च मातुलवंश्या न तान् श्राद्धे
नियोजयेत् ॥ साधून् क्षीणदोषान् गृहस्थान्निमंत्रयेत् ॥ तथा च विष्णुपुराणे ॥
साधवः क्षीणदोषास्त्विति ॥ पुराणसमुच्चये ॥ गृहस्थं कुलसंपन्नाः प्रख्या

५

॥५॥
॥नव०

ताः कुलगोत्रजः ॥ स्वदारनिरताः शांता विज्ञेयाः पंक्तिपावनाः इति ॥ श्रोत्रियान्नु
निमंत्रयेदिति शेषः ॥ श्रोत्रियलक्षणमाह देवलः ॥ एकां शाखां सकल्पां षड्भिरंगै च
रधीत्य च ॥ षट्कर्मनिरतो विप्रः श्रोत्रियो नाम धर्मवित् ॥ कल्पस्य पृथक् ग्रहण
मादरार्थं ॥ तथा हि ॥ जन्मना ब्राह्मणो ज्ञेयः संस्कारैर्द्विज उच्यते ॥ विद्यया या
ति विप्रत्वं त्रिभिः श्रोत्रिय उच्यते ॥ देवलः ॥ ज्ञानतपोवयोवृद्धान्निमंत्रयेदि
त्यर्थः ॥ अनवद्यान् स्वधर्मस्थान् स्वजातिविहितं तथा सोनुष्ठानरतान्नि
मंत्रयेत् ॥ एवं मुख्यकल्पं दर्शयित्वानुकल्पं दर्शयति ॥ अभावे पि शिष्या
न्स्वाचारान् ॥ पूर्वोक्तानां ब्राह्मणानां अभावे शिष्यानपि स्वाचारा
न्निमंत्रयेत् ॥ शिष्या ब्रह्मचारिणः ॥ स्वाचारानिति अग्निपरिचर
णगुरुशुश्रूषाभिरतान् ॥ तेषां चैवान्नं निषिद्धोपि वाचनिकं श्राद्धभो
जने ॥ व्यासः ॥ अनित्यामंत्रितः श्राद्धे विप्रोध्यात् गुरुचोदितः ॥ एकान्न

॥५॥
॥वृद्धि०

मविरोधेन व्रतानां प्रथमाश्रमे स्मृतिः ॥ अत्रिः ॥ कुनखिकुपुत्रादयो व्हेलेन सकृ
त्या ब्राह्मणाद्विजाः ॥ वैश्वदेवे नियोक्तव्याः पर्यंते गुणवत्तरा इति ॥ एवं निमंत्र
णीया नुत्क्वा ॥ अथ वर्ज्यानाह ॥ द्विनग्न शुक्ल विक्लिष्ट श्यावदंत विद्रुप्रजनन
व्याधित व्यंगि श्वित्रि कुष्ठि कुनखि वर्ज्यं ॥ द्विनग्नादुष्ट्य मांसचर्मात
रगुरुतल्पगो भूतः ॥ अथ वा पयोर्गोत्रयोर्वेदस्यागते श्याविच्छेदः सद्वि
नग्नः ॥ तदुक्तं ॥ यस्य वेदश्च वेदी च विच्छिद्येते त्रिपूरुषं ॥ द्विनग्नः स तु
विज्ञेयः श्राद्धकर्मणि निंदित इति ॥ शुक्लेति गोरो मंडलकुष्ठी वा ॥ विक्लि
श्यो दंतुरः ॥ तथोक्तं मनुना ॥ यस्य नैवाश्य रोष्ठाभ्यां छाद्यंते दशनाव
ली ॥ विक्लिष्टः स तु विज्ञेयो ब्राह्मणः पंक्तिदूषणः ॥ विक्लिधः प्रतिगंधि[illegible]घोल इति ॥
गोभिलीये श्राद्धकल्पभाष्ये ॥ श्यावदंत इति स्वभावात्कृष्णदंतः ॥ विद्रुप्रजननः द्वि

५

त्रलिंग॥ चर्मोदा क्षिण्यं प्रसिद्धः॥ व्याधितो व्याधियुक्तः॥ व्यंगो हीनांगोऽधिकांगो
विरूपांगौ संस्थितः श्वेति॥ अतः कुनखवत् मुखहस्तपादादीनां च प्रतिषेधः॥
सिध्यति हीनांगोऽधिकांगश्च हीनातिरिक्तांग इति स्मृतेः श्वित्री श्वेतकुष्ठी॥ कु
ष्ठी गलितांगः॥ कुनखी॥ कुत्सितनखः॥ एतान् वर्जयित्वा निमंत्रयेत्॥ ननु एता
वतैव अन्येषां वर्जनं भविष्यति॥ यदेतेऽपवेष्ट्याद् स्मृतं किमत्र द्विर्नग्नादीनां नि
षेधः॥ कुतोऽनधिकारार्थत्वात्॥ उच्यते॥ सत्यं भवत्येवाऽर्थान्निषेधो यदा
विहिताऽन्ये स्युः तत्काल व्यतिरिक्ता नाम अर्थान्निषेधः॥ किंतु विहितानां ब्राह्म
णानामप्राप्तौ निषिद्धातिरिक्तांतरालिकब्राह्मणप्राप्त्यर्थं द्विर्नग्नादिवर्जनं॥
अन्यथा विहितब्राह्मणालाभे तद्व्यतिरिक्तसमस्तवर्जने श्राद्धकर्मलोपः स्यात्॥
तस्मात् प्राप्त्यर्थं द्विर्नग्नादिवर्जमिति ज्ञापनार्थं तद्गृहीतान्नपूपवेशयेत्॥ अ
निंद्येनामंत्रितो नापक्रमेत्॥ अनिंद्यो लोकापवादरहितस्तेन श्राद्धार्थं
निमंत्रितो नापक्रामेत्॥ अनिंद्यो लोकापवादरहितस्तेन श्राद्धार्थं निमंत्रितो

विप्रो नव्यतिक्रमं कुर्यात्॥ तथा चाग्निष्टोमप्रकरणेऽध्वरकांडे श्रुतिः॥ स होवाचाग्निं द्या
वेमावृषतसोऽग्निं ध्योः तस्तु पश्चान्यायं हव्यवृद्ध्येदिजोत्तमः॥ कृपं चिद् व्यतिक्रामन्याय
शूकरतां व्रजेदिति॥ न केवलं ब्राह्मणव्यतिरिक्तं मो दोषो यजमानोपि ब्राह्मणमतिक्र
म्य दोषी स्यात्॥ तथाहि यमः॥ आमंत्र्य ब्राह्मणं यस्तु पश्चान्यायं न पूजयेत्॥ अतिकृच्छ्रा
त्स घोरासु तिर्यग्योनिषु जायत इति॥ आमंत्रितो वान्याद्दत्तेन प्रतिगृह्णीयात्॥ निमं
त्रितो विप्रो यदन्नं श्राद्धादिरूपमामान्नं सिद्धं वा न प्रतिगृह्णीयात्॥ भोजनार्थं वान
कुर्यात्॥ यथाह देवलः॥ पूर्वं निमंत्रितोऽन्यस्य यदि कुर्यात् प्रतिग्रहं॥ भुक्त्वाहारोऽपि वा
भुंक्ते सुकृतं तस्य नश्यति॥ अन्येनामंत्रितस्यान्यश्राद्धग्रहणे दोषमाह मार्कंडेय
पुराणे व्यासः॥ भुंक्ते श्राद्धं लुब्धोऽन्यस्य नरोऽन्येनाभिमंत्रितः॥ देवेभ्यः पितृभ्यश्चापि त्रो
स लुनिरुष्यते रवमेः॥ यमोपि॥ आमंत्रितश्च यो विप्रो भोक्तुमन्यत्र गच्छति॥ न
रकाणां शतं गत्वा चांडालेष्वभिजायत इति॥ अथोपवेषणमाह॥ स्नातान्प्राचीना
चांताञ्श्राद्धस्वानुपवेशयेद्देवे युग्मान युग्मान्यथाशक्ति पित्र्ये॥ उपवेशये दिति वाक्य

॥७॥
नव०

शेषः कीदृशानुपवेशयेत् स्नातान्कृतान्कुवान्पुनः कीदृशान् शुचीन् सूत्रबुद्धिरहि
तान्पुनः कीदृशान् आचांतान् यथाशास्त्रमाचांतान् यथापूर्वं चितः ॥ एवंभूतान् दै
वे वैश्वदेवार्थं युग्मान् इति बहुवचनात् ऋतुरादीन् प्रागग्रेषु कुशेषु प्राङ्मुखानुपवेशय
यथाशाखं युग्मान् त्रिपर्यादीन् पित्र्यर्थमुपवेशयेत् ॥ द्विगुणभुग्नाग्रेषु कुशेषु ॥ अयु
ग्मत्वं च नवभ्यो वागभ्यो दितव्यं ॥ तथा च गौतमः ॥ नवावरान् भोजयेदयुजो यथोत्सा
हं चेति ॥ ब्रह्मांडपुराणेपि ॥ सामर्थ्येपि नवभ्यो वा भोजयीत सप्तद्विजान् ॥ नोर्ध्वं
कर्त्तव्यमित्याहुः केचिद्दोषस्य दर्शनादिति ॥ अत्र स्नानग्रहणं ॥ गौणस्नाननिषेध्या
र्थं ॥ अथवा स्मृतिप्राप्तमेवानुवददिति ॥ अथवा विशिष्टविधिः ॥ तथा च वायुपुराणे ॥
सुरभीणि तु स्नाता निर्गंधवंति तथैव हि ॥ श्राद्धे होतानि यो दद्याद्भवमेधफलं लभे
दिति ॥ देवलोपि ॥ ततो निवृत्ते मध्याह्ने कृप्तलोमनखान्द्विजान् ॥ अभिगम्य यथा
पूर्वं प्रयच्छेद्दंतधावनं ॥ तैलमुद्वर्तनं स्नानं स्नानीयं च पृथग्विधं ॥ पात्रैरौदुंबरैर्दद्या
द्वैश्वदेवस्य पूर्वकमिति ॥ आचमने विशेषो विष्णुपुराणे ॥ उपस्पर्शस्तु कर्त्तव्यो म

॥७॥
॥ कृ० ॥

॥८॥
न ४०

सर्जोनिं दद्यात् पुत्रो कृष्वितिः ॥ देशकालधनाभावे पक्षांतरमाह ॥ एकैकमुभयत्र वा ॥
एकं दैवे एकं पितॄणामित्यर्थः ॥ तथाच ब्रह्मपुराणे ॥ देशकालधनाभावादैकैकमु
भयत्र वा ॥ शेषान्विताऽनुसारेण भोजयेदन्यवेश्मनीति ॥ स्मृतिः ॥ अपुत्रमानपस
व्ये न पितृपूर्वं निमंत्रयेत् ॥ पित्रादेः सपंच त्रिनैकैकस्यैकमेव वा ॥ दैवे षट्चतु
रो द्वौ वा ___ पैकैकमुभयत्र वेति ॥ मातामहानां चैवं ॥ मातामहानामप्येवं सर्वेप
क्षाभावेपुरित्यर्थः ॥ तत्र केचिदिममुपदेशमन्यमानाः ॥ एव कुर्वन्ति मातामह
श्राद्धमिच्छंति ॥ पद्मा मातामहेभ्यो दद्यातितदैवमिति ॥ तदेतदुपेक्षणीयं ॥ अपरे
तु ॥ पार्वणं कुर्वते ये तु वृद्धे वल्ले पितृहेतुनः ॥ मातामहं न कुर्वते पितृहा सोऽभिजायत
इति ॥ स्कंदपुराणवचनात् ॥ पितॄणामिव मातामहानामपि तस्मैतास्मिन्नेव प्रयो
गे दानमिच्छंति ॥ तच्छातीव पुत्रतरं ॥ तथाच ॥ पितरो यत्र पूज्यंते तत्र मातामहाध्रु
वमिति ॥ तंत्रं वा वैश्वदैविकं ॥ विश्वेदेवास्तंत्रेणवा पएव पितृभ्यो मातामहेभ्यो

॥८॥
॥ कं ३०

पितरएव॥ सचायमन्यःपक्षः तथान्यदपि ब्राह्मणाभावे॥ एकएवयदा विप्रोद्विती
योनोपपद्यते॥ पितॄणां ब्राह्मणोयोऽयौदैवेसंगिंनियोजयेत्॥ प्रक्लिप्तापात्रमुध्धृ
त्यैमारभेदिति॥ तथाहि॥ यद्येकं भोजयेच्छ्राद्धे दैवंतत्रकथंभवेत्॥ अन्नंपात्रे
समुध्धृत्यसर्वस्य प्रकृतस्यच॥ देवतायतनेस्थाप्यततः श्राद्धंच कल्पयेत्॥ प्रा
स्येदग्नौतदन्नंतु दद्याद्वाब्रह्मचारिणइति॥ अग्न्यन्वितः श्राद्धंकुर्वन्तः॥ नात्रश्रेद्धा
निमित्तत्वेनोच्यते॥ यछ्राद्धंकुर्वन्तस्वाकालेतछ्राद्धयेस्यर्थः॥ श्राद्धेनापिनापर
पक्षमतिक्रामेत्॥ यच्चन्नेललेनमेतत्तदा श्राद्धेनाप्यपरपक्षश्राद्धंकुर्यात्॥ त
थाचब्रह्मपुराणे॥ पयोमूलफलैः श्राद्धैः वेछ्छपक्षस्यसर्वदा॥ पराधीनंप्रवा
सीवानिर्धनोवापिमानवः॥ मनसाभावशुद्धेन श्राद्धंदद्यात्तिलोदकैरिति॥ अ
नेनावश्यंकर्तव्यताभिहिता॥ तत्रहेतुमाह॥ मासिमासिवोशनमितिश्रुतेः॥
लदहः श्रुचिरक्रोधनोऽत्वरितोऽप्रमत्तः सत्यवादीस्यादध्वमैथुनश्रमस्वाध्यायान्वर्जयेत्॥

8

॥१९॥
॥नव०

तदहस्तस्मिन्नहनि श्राद्धदिने एते नियमाः॥ शुचिर्बाह्याभ्यंतरः वसनरच्छ आबाध्य शु
द्धि रहितः॥ अथवा शुक्लवासः शुचिः॥ कषायादेः प्रतिषिद्धत्वात्॥ तथा च हरीतः॥ शुच
यः॥ शुचिवाससः॥ स्मृरिति॥ अप्रमत्त इति स्मृत्यूक्तालस्यादिदुःसावधानः॥ स्वाध्याय
श्राद्धमंत्रजपादिव्यतिरिक्तवेदपाठः॥ मैथुनं पूर्वदिनेपि॥ सुगममन्यत॥ अन्ये पि द
त्तभ्योक्तोर्नियमाः॥ स्मृत्यंतरागात्॥ यमः॥ पुनर्भोजनमध्वानं भाराध्ययनमैथुनं
संध्यां प्रतिग्रहं होमं श्राद्धभोक्ता ष्टवर्जयेत्॥ इति मत्स्यपुराणे॥ पुनर्भोजनमध्वा
नं पानमायासमैथुनं॥ श्राद्धकृच्छ्राद्धभुक्चैव सर्वमेद्विवर्जयेत्॥ स्वाध्यायं कलं
हं चैव दिवास्वापं तथैव च॥ पानं सुरापानं तद्विजस्य प्राप्तं तस्यैव निषेधः॥ दंतधाव
नं तांबूलं स्निग्धस्नानमभोजनं॥ इत्यौषधं॥ परान्नं च श्राद्धकृत्सर्वं वर्जयेदिति॥
दंतानां धावने प्राय श्चित्तमुक्तं॥ विष्णुपुराणे॥ श्राद्धोपवासदिवसे स्वादंतधावने
गायत्र्याः शतसंपूतमंबु प्राश्य विशुद्ध्यतीति॥ अध्वादिगमने दोषमाह यमः॥ आ
मंत्रितस्तु यः श्राद्धे अध्वानं प्रतिपद्यते॥ भ्रमंति पितरस्तस्य तं मासं पांसुभोजिनः॥

॥१९॥
॥कृ३०

याज्ञवल्क्यः ॥ अध्वनीनो भवेदश्वः पुनर्भोक्ता तु वायसः ॥ होमस्य मैत्ररोगी स्यात्साग्ग
दायुः प्रहीयते ॥ दानं निःफलितामेति प्रतिग्रहो हि हरिद्रता ॥ कर्मच्छ्रंश्जायते दासो मैथु
नी मुक्ररोसवेदिति ॥ मैथुनं चाष्टविधं ॥ दक्षः स्मरणं कीर्तनं केलि प्रेक्षणं गुह्य
भाषणं ॥ संकल्पोऽध्यवसायश्च क्रियानिष्पत्तिरेव चेति ॥ तृप्तानात पः ॥ श्राद्धं
कृत्वा परश्राद्धे भुंजते ये तु मोहिताः ॥ पतंति पितरो तेषां लुप्तपिंडोदकक्रियाः ॥
अन्ये च नियमास्तत्र तत्र वक्ष्यंते ॥ ते च श्राद्धप्रधाने गौणत्वे च न्यायबाधि
ताः ॥ क्वापि केऽपि न भवंति ॥ पश्चात्तीर्थश्राद्धे अध्वाद्युपवासश्च न दोषापग
प्रौघ्यान निमित्ते श्राद्धे मैथुनं अग्निहोत्रनिमित्त श्राद्धे होमः ॥ स्वद्वितीय
विवाहश्राद्धे प्रतिग्रहः ॥ एवं कन्यादानात् ॥ वृद्धपिके दानं ॥ तीर्थयात्रारंभ
समाप्त्योरध्वान मेव ॥ तेषां परतंत्रत्वात् ॥ एवं च स्वयमूहनीयं ॥ आवाहना
दिवाग्पतऊौपस्पर्शनात् ॥ आवाहनादि आवहनादरभ्य आद्युपस्पर्शनाद्रो

॥१०॥
॥नव०

कुर्याच्चमनपर्यंतं यजमानो वाग्यतो भवेत् ॥ वाग्यमनलोपे वैष्णवं मित्रजपो विष्णुस्म
रणं वा प्रायश्चित्तं ॥ तथाच पारिजाते लक्ष्मः ॥ यदि वाग्यमनलोपः स्याज्जपादिषु कर्म
चन ॥ व्याहरेद्वैष्णवं मंत्रं स्मरेद्वा विष्णुमव्ययं ॥ अज्ञानाद्यदि वा मोहात्प्रच्यवेता
ध्वरेषु यत् ॥ स्मरणादेव तद्विष्णोः संपूर्णमस्यादिति श्रुतिः ॥ तथाच शातपथी
श्रुतिः शुश्रू ॥ अथ यद्वाचंयमो व्याहरति तस्मादु हैष विसृष्टो यज्ञः पराङावर्त
ते ॥ तत्र वैष्णवीमृचं वा यजुर्वा जपेदित्यादि ॥ ॥आमंत्रिताश्चैवं ॥ ॥आमंत्रितो
ये ब्राह्मणास्तेपि एवमेवानुष्ठानं कुर्युः ॥ इति त्रिरात्रिविसंम्राड्स्थपति श्री
महायाज्ञिकवामनात्मजदीक्षितगंगाधरविनिर्मिते कात्यायश्राद्धकल्पविवरणे
प्रथमकंडिका ॥ ॥ दैवपूर्वं श्राद्धं ॥ अपउपस्पर्शनादिरनुवर्त्तते निमंत्रणा
दि आचमनपर्यंतं श्राद्धे यत्किंचित्क्रियमाणं तत्सर्वं दैवपूर्वकं कर्त्तव्यमित्यर्थः
तथाच देवलः ॥ यत्र यत्र क्रियते कर्म पैतृकं ब्राह्मणान्प्रति ॥ तत्सर्वं तत्र कर्त्तव्यं वै

॥१०॥
॥कुं०

१२

वैश्वदेवस्यपूर्वंग्रमिति॥पिंडपितृयज्ञवदुपचारःपित्र्ये॥पितृकर्मणिपिंडपितृय
ज्ञवत्कुररणंभौतासर्पः॥अनेनापसव्यंदक्षिणामुखंवामजानुपातात्यतिदिष्टं॥
अतश्चयेनिविबंधनादिपिंडेस्थापनपर्यंतंपिंडपितृयज्ञेतूधर्माभवतीति॥एतद
पवादः॥अपसव्येनकर्तव्यंसर्वंश्राद्धंयथाविधिः॥तत्तत्स्तोत्रजपमुक्तानिप्राणांच
विसर्जनं॥अपिच॥तत्तत्स्तोत्रजपमुक्तापिंडाद्याणांचदक्षिणा॥आवाहनंस्वाग
तेचैवविनाचपरिवेषणं॥विसर्जनेसौमस्यमाशिषांप्रार्थनंतथा॥विप्रप्रद
क्षिणांचैवस्वस्तिवाचनमेवंविना॥पित्र्यमन्यत्सर्वकर्तव्यंप्राचीनावीतिनासदेति
मदग्नि॥ ॥द्विगुणास्तुदर्भाःपित्र्यइत्यनुवर्तते॥ ॥तुपुनःपित्र्योहविरुत्सर्गा
दौद्विगुणीकृताद्दर्भाभवंति॥अर्थादैवेकैकावइति॥अत्राहबौधायनः॥प्रदक्षि
णांतुदेवानांपितॄणामप्रदक्षिणं॥देवानामृजवोदर्भाःपितॄणांद्विगुणाःस्मृताः॥
कात्यायनस्मृतौविशेषः॥सापिंडीकरणांयावदृजुदर्भैःपितृक्रिया॥सपिंडीकर

॥११॥
नव०

पादूर्ध्वं द्विगुणो विष्टिरुद्रवेदितः ॥ दर्भेणोद्भवां चोक्तं यज्ञपार्श्वे ॥ शुद्ध दर्भा यज्ञियाः दर्भाः
श्वेत दर्भाः पाकयज्ञिकाः ॥ ~~कृष्ण दर्भाः पाकयज्ञिकाः~~ ॥ नील दर्भाः पितृदेवताः ॥ श्वेत दर्भा वैश्व
देविकाः ॥ हरिता यज्ञिकाः दर्भाः पीतकाः पाकयज्ञिकाः ॥ समूलाः पितृदेवताः ॥ कल्मा
षा वैश्वदेविकाः ॥ अप्रसूताः स्मृता दर्भाः प्रसूतास्तु कुशाः स्मृताः ॥ आमूलाः कुत
पाः स्युर्यादि सेषां नैगमी श्रुतिः ॥ प्रादेश दर्भ्यिका दर्भाः त्रिपत्रादियुतास्त्वये ॥ कुशा
स्तेयाश्च द्वैः प्रोक्ताः स्नानादिषु पवित्रकाः ॥ दर्भाद्भिर्मर्व्यं दापयते श्राद्धकाले पुष्पिंति
लाः ॥ किमर्थं वेद विप्रा हे द्विमर्थं हरि उच्यते ॥ रक्षंति राक्षसान् दर्भास्तिला र
क्षंति चासुरान् ॥ वेदविद्रक्षये श्राद्धं पतीनां दत्तमक्षयमिति ॥ दर्भाभावे कुशा
दि ग्रहीत्वा कर्म कुर्यात् ॥ तथा च स्मृतौ ॥ कुशाभावे तु काशाः स्युः काशाः कुशाः समाः स्मृताः ॥
काशाभावे ग्रहीतव्या अन्ये दर्भाः पथोचिताः ॥ दर्भाभावे स्वर्णरूप्यताम्रैः कर्म क्रियाः
सदा ॥ कुशाः काशाः शरा दूर्वा यवगोधूमबल्वजाः ॥ सुवर्णरजतं ताम्रं दश दर्भाः प्रकीर्तिताः ॥

॥११॥
॥कुं१०

स्नाने होमे तथा दाने स्वाध्याये तर्पणेपि च ॥ पवित्रपाणिर्दद्यादासीन सर्वत्र ॥ १ ॥ सर्वत्र
ग्रहणाद्देवपित्र्ये च यत्किंचिद्ददातित सर्वमासीनः पवित्रपाणिः सन्दद्यात् ॥ पवित्र
पाणिः कुशपाणिः पवित्रशब्दोऽत्र कुशवचनः ॥ पवित्रस्थ इतिमंत्रलिंगात् ॥ अथवा
स्मृतिप्राप्तं पवित्रपाणिमासीनत्वं चात्र सार्थक्येनानुवदति ॥ तेन वामहस्ते कुशा
दानमावाहने स्वासीनत्वं निषेध्यते सर्वे ॥ तथा च पठंति ॥ वामहस्ते धृतादर्भाग
हेरंगवल्लीस्तथा ॥ ललाटे तिलकं दृष्ट्वा निराशाः पितरो गता इति ॥ विंचावाहने ना
गच्छन्तु पितृष्वर्तुः रासीनत्वं नयुक्तं ॥ तथा च पुराणोक्तं लिंगं ॥ अथ प्रांजलि[illegible]स्था
य स्थित्वा चावाहयेत्तितृ निति ॥ ॥ प्रश्नेषु पंक्तिमूर्धन्यं पृच्छति सर्वान्वा ॥ वाशब्दो
विकल्पार्थः ॥ वक्ष्यमाणेषु आवाहनादि प्रश्नेषु पंक्तिमूर्धन्यं प[illegible]ति राघं ब्रा
ह्मणं पृच्छेत् । सर्वान्वा पृच्छेत् ॥ तुल्यविकल्पस्याष्टदोषदुष्टत्वात् व्यवस्थित विकल्पो
यमिति श्राद्धकल्पकाराः ॥ तुल्यविकल्पौ एवाचमिति कर्काचार्यादयः ॥ आसनेषु द

१४ आसनेषु पादेषु दर्भानास्तीर्या छादनकर्त्ता विश्वान्देवानावाहयिष्ये इति पृच्छेत् ॥१२॥

॥१२॥ ॥न४०

र्भानास्तीर्य विश्वान्देवानावाहयिष्ये इति पृच्छेत् ॥ पंक्तिमूर्धन्यं सर्वान्वा आसनान्याह स्मृतिः ॥ रोमी मूर्धापर्ये श्रान्ता अन्ये वेदं बोवारणास्तथा ॥ ॥पंचासनानि शास्त्रा त्रिश्राद्धेवा देवानां तार्चने ॥ तथा ॥ श्रीपर्णीवरूणाश्वारी राजं बुञ्जाम्रवृद दं बर्ज ॥ सत्वामकु लं पीठं पितॄणां दत्तमक्षयमिति ॥ आसनेषु दर्भानास्तीर्येतिवदता हस्ते षु विष्टर वदानं निराकृतं ॥ कर्काचार्यास्त्वेवमाहुः ॥ एतदास्तरणसामर्थ्यात् पूर्वमुपवेशना द्रष्टव्यं ॥ पाठक्रमादर्थक्रमस्य बलिष्ठत्वात् ॥ ॥आवाहयेसनुज्ञातो विश्वेदेवा स आगतेसनुआऽवा पाववीर्यं विश्वेदेवाश्र णुतेममिति तं जपित्वा पितॄनावाह यिष्य इति पृच्छति ॥ ततो ब्राह्मणैरावाहयेसनुज्ञातो विश्वेदेवास आगतो सनु याऽकत्वा वास्तवैश्वदेवब्राह्मणपुरतो यवान्प्रादक्षिण्येनावकीर्य विश्वेदेवा श्रणुतेममिति मंत्रं पठित्वा पितॄनावाहयिष्ये इति पृच्छति ॥ अत्रैव तिलविकि रणमिति कर्काचार्या आहुः ॥ अन्ये तु ॥ यवैस्त्ववकीर्येति याज्ञवल्क्यः वचनो

॥१२॥ ॥४१०

घवैः कुर्वंति ॥ द्विजानेकस्वेपि न प्रतिद्विजमावाहनावृत्तिः ॥ सकृदावाहने
नैवानेकब्राह्मणादिपिण्डानेदेवतत्वास्मनसंभवात् ॥ आवाहयेसनुइस्ता
त्उशंतस्त्वेसन याबाह्यावकीर्यायंतु न इति जपित्वायज्ञियवृक्षचमसे शुच
वित्रांतर्हितेष्वेकैकस्मिन्नप आसिंचति शन्नोदेवीरिति ॥ आवाहयेति ब्राह्म
णैरनुज्ञातः पितृनुशंतस्त्वेति मंत्रेण पितृनावाह्य पितृब्राह्मणानग्रतस्तिला
न्प्रास्याक्षिप्येनावकीर्यायंतु नः पितर इति पठेत् ॥ याइस्त्रं अर्हंतीति यज्ञियाः
२४ पालाशादयः ॥ यज्ञत्विग्भ्यां घौभावितिघप्रत्ययः ॥ तेवै पालाशाः स्फारि स्फ
पक्रम्य एते हि वृक्षा यज्ञियाइतिहविर्यज्ञकांडश्रुतिः ॥ एषामन्यतमे शुच
मन्त्रोषु अनंतरगर्भस्याग्रप्रादेशमात्रकुशद्वयसहिते शन्नोदेवीरस्मि
ष्टयइत्यनेनएकैकस्मिन्नपोनिषिंचेत् ॥ एकैकस्मिन्निति प्रतिपात्रं मंत्रा

२२

वृत्तिरित्तिदर्शयति ॥ चसमानां लक्षणं चोक्तं पूलपार्श्वे ॥ चमसानां तु वृक्ष्यामि
दंडाः स्युश्चतुर्विंशत्यंगुलाः ॥ त्र्यंगुलं तु भवेत्खातं विस्तारश्चतुरंगुलः ॥ वैकंकत
मयाः श्लक्ष्णास्त्वग्बिलाश्चमसाः स्मृताः ॥ अन्योन्यावपिवृत्ताग्रीयाः स्फुरि
त्ति ॥ तत्रैवोक्तं प्रादेशमात्राः ॥ पवित्रलक्षणं छन्दोगपरिशिष्टे ॥ अनंतर्ग
र्भिणं साग्रं कौशं द्विदलमेव च ॥ प्रादेशमात्रं विज्ञेयं पवित्रं यत्र कुत्रचित् ॥ इति ॥
अत्र देवपात्रे देवपवित्रे पितृपात्रे त्रित्रिपवित्राणि भवंति ॥ तदुक्तं च तुर्विंशतिमते ॥ द्वे देवे श
लाके देवानां तिस्रस्तिस्रस्तु पार्वणे ॥ एकोद्दिष्टे शलाकैका श्राद्धे वृद्धे च पुनिक्षिपेदिति ॥
अत्र याज्ञवल्क्यवचनेनावाहनार्घ्यपूरणादानां यद्यपि क्रमानुसमयः प्रतीयं
ते तथापि पदार्थानुसमयो बोद्धव्यः ॥ तुल्यसमवाये सामान्यपूर्वमानुपूर्व्ये योगा
दिति परिभाषितत्वात् ॥ अस्यार्थः ॥ तुल्यानां प्रधानानां समवाये एकप्रयोगात् तु
ष्ठाने यत्साधारणमंगजातं तत्सर्वेषां पूर्वं भवेति ॥ तथा सत्यानुपूर्व्ये पापदार्थाः कृता भवंति ॥

तथा श्राद्धे पित्रादिषड्वागणकत्रयप्रयोगक्रियंते तत्रानिमंत्रणादयः सर्वे
षांक्रमेणपदार्थाअनुष्ठितंभवंति॥ अन्यथाएकैकस्य पित्रादेः सर्वेप
गस्यपरिसमाप्तौद्वितीयोपक्रमेक्रमभंगः स्यात्॥ प्रथमस्य विसर्जने॥
द्वितीयस्यामंत्रणमापद्येत॥ तथासत्यानुपूर्वोभंगः प्रसज्येत॥ त
च्चानिषिद्धं॥ तस्मादेकैकंपदार्थजातंसर्वेषांमपिनिर्वाह्य द्वितीयप
दार्थनिर्वाहः कार्यः॥ एवमपिबहुभिः पदार्थैर्व्यवधानंभवतितच्च
तद्दोषायनहिसजातीयैर्व्यवधानमिष्यते॥ तस्मात्सर्वेषांनि
मंत्रणपाद्यादिः॥ एवंआवाहनामपिआंवहनावाद्भिरणजप
समुदायरूपं। जपैरेवनइतिमंत्रलिंगात्॥ अतएवहेभ्रोदि
ष्या

तीर्थ्य श्राद्धकल्पे निःसश्राद्धे आवाहननिवृत्तौ त्वयमपि निवर्तते ॥ कात्या
यनस्य पक्षप्यनुसमय एवाभिमतः ॥ देवानावाहनानंतरं पित्र्या
वाहनोक्तेः ॥ एकैकस्मिन्नर्घ्यमासिंचती तिसर्वपात्रे जलप्रक्षे
पावसानात्समावाहनानंतरं । गमात्रस्य हनेनंतरं एकैकस्मिन्नेव तिल
नावपतीति विधानात् ॥ अत एवैकस्यार्घ्यपात्रे जलादि पुष्पांतं प्रक्षि
प्यार्घ्यदानांतं वा निर्वर्त्य पात्रांतरे प्रक्षेपा मिति मतं न युक्तं ॥ किंच पदार्थानां क्रमानुरोधा
दपि पदार्थानुसमय एवार्हति ॥ ततो नि मंत्रणादावपि पदार्थानुसमय एव ॥ एकैकस्मि
न्नेव तिलानावपति तिलोसि सोमदेवत्यो गोसवो देवनिर्मितः ॥ प्रत्नमद्भिः पृक्तः स्व
धया पितॄंल्लोकान्प्रीणाहि नः स्वाहेति ॥ तिलोसीत्यनेन एकैकस्मिन्पात्रे तिलानावप
ति प्राक्षिपति आदौ देवपात्रे प्रक्षिप्य ततः पितृपात्रेषु प्रक्षेपः ॥ ननु एकैकस्मिन्नेसनुव

र्नमाने पुनरेकैकस्मिन्नपि ग्रहणं द्विमर्थं ॥ उच्यते ॥ तिलोस्मीति मंत्रे पितॄन् प्रीणयाही
ति बहुवचनात्तेन पितृशब्दे नैकद्व्यादेस्तु ग्रहणसद्भावं मंत्रः प्राप्नोतीति तन्मा भूदित्येवैकस्मि
न्नेति पुनर्ग्रहणं ॥ सौवर्णराजतौदुंबरखड्गमणिमयानां पात्राणामन्यतमे पुण्यानि वा
विद्यंते ॥ ॥ उदुंबरवृक्षस्य तु यज्ञियवृक्षत्वमसे चिसनेनैवोक्तत्वात् ॥ मणिमयानि शंख
स्फटिकादिपात्राणि एषां मध्ये एकस्य पात्राणि गृह्यंते ॥ यानि वा विद्यंते इति नि
षिद्धेतराणि मन्मयादीन्युच्यंते ॥ तथा वच्छंदोगपरिशिष्टे ॥ आसुरेण तु पात्रेण यस्तु
दद्यात्तिलोदकं ॥ पितरस्तस्य नाश्नंति दशवर्षाणि पंच च ॥ कुलालचक्रनिष्पन्न
मासुरं मन्मयं स्मृतं ॥ तदेव हस्तघटितं स्थाल्यादि दैवकं भवेत् ॥ इति राजतं तु पित्र्य
एवोक्तं वायुपुराणे ॥ तथार्घपिंडभोज्येषु पितॄणां राजतं मतं ॥ अमंगल्यं तु यत्नेन दे
वकार्येषु वर्जयेत् ॥ पत्रपुटेषु वा ॥ शब्दो विकल्पार्थः ॥ एवं सूत्रोक्तविहितप्रतिषिद्धानि
बध्यार्थ इति ॥ आह काशिकाकारः ॥ पूर्वोक्तानामलाभे यालाशोपालाशादि यज्ञिय
वृक्षपत्रपुटेषु वाऽर्घ्यं पूरयेत् ॥ तथा चोक्तं ब्रह्मपुराणे ॥ अश्मपत्रपुटे दद्यात्सुनीनां वल्कलो

विप्रस्य अर्घ्यपात्रैर्निक्षिपेदिति प्राचेतसोक्तेश्च वैश्वदेविके ब्राह्मणासंख्यया पात्राणि कु
र्वीति ॥ कर्कमते सेकमेव पात्रं देवे ॥ केचिदितरहस्तध्रं लं पवित्रं पुनरर्घपात्रेण कुर्वंति ॥ त
दतीव मंदं ॥ तत्र स्योपादाने प्रमाणाभावात् ॥ या दिव्या इस स्यार्थः ॥ आपः पानीयानि प
यसा संबभूवुः ॥ संगमन्वा बभूवुः ॥ माधुर्यरसो तत्वादिना ये आभूताः ॥ आस्ता आ
पः या दिव्याः दिवि स्वर्गे भूताः ॥ उत अपि या अंतरिक्षाः आकाशे भूताः ॥ उत अपि
पार्थिवीयाः पृथिव्यां भूताः उत शब्दद्वाभ्यां संबध्यते ॥ किं भूता हिरण्यवर्णाः हिर
ण्यरूपं तं तत्समानवर्णाः ॥ शुक्लवर्णा इस र्थः ॥ पुनः किं भूताः ॥ यज्ञियाः यज्ञार्हः ॥ ता
आपः नो अस्माकं शिवाः क्षेमा भवंतु ॥ न केवलं अपि शं कल्याण्यो भवंतु ॥ स्योनाः सुख
दा भवंतु ॥ सुख ॥ वा सुखं आहस्ताहस्तेकृता भवंति विसर्जनेनैव संबंधः ॥ स्योना इति सुख
दा भवंतु ॥ स्योना इति सुखस्य नामइ निया स्कः ॥ एकैकमृभ यत्र वे सस्मिन्पक्षे पित्र
पात्रत्रयं कार्यं ॥ प्रथमे पात्रे स[?]ंस्त्रवान्समवनीय पितृभ्यः स्थानमसीति कुब्जं

ति

पात्रं निदध्यादिति ॥ संस्रवशब्देनार्घपात्रलग्नापोऽपचयवाच्या अभिधीयंते ॥ स पुंस्र
वो स्येच खलु पारिशिष्टो भवतीति श्रुतेः वाक्यात् ॥ प्रथमे पात्रे पितुः प्रथमेऽ
र्घपात्रे संस्रवान्समवनीय निक्षिप्य पितृस्थानमसीत्येतेन मंत्रेण तत्प्रथमं
पात्रं न्युब्जं मध्ये मुखं निदध्यात् ॥ अत्र यमः ॥ पैतृकं प्रथमं पात्रं तस्मिन्पैता
महं न्यसेत् ॥ प्रपितामहं ततो न्यस्य नोद्धरेत्तु विचालयेत् पैतामहं संस्रवं मिश्रयर्घ ॥
पुराणे विशेषः ॥ आसिंच्य प्रथमे पात्रे सर्वपात्रैस्य संस्रवान् ॥ ताभिरद्भिर्मुखं सिं
चेद्यदि पुत्रमभीप्सति ॥ चतुर्विंशतिमते संस्रवान्प्रथमे पात्रे निधायाद्भिर्मुखं
स्पृशेत् ॥ अद्भिर्मुखं स्पर्शनं स्य पुरुषार्थत्वाद्दिवृत्ता व प्रवृत्तिः ॥ तत्र न्युब्जीकर
णं पितृश्रीलपस्य वामपार्श्वे ॥ तथा च मत्स्यपुराणे ॥ पाद्यं व्यसर्घमुत्तरन्यपद्या
द्ध्यादिव्रतलः ॥ वस्त्रेतरं चानुपूर्व्या दत्त्वा संस्रवमादितः ॥ पितृपात्रे प्रदायाथ न्यु
ब्जमुत्तरतो न्यसेत् ॥ इति उत्तरशब्दो वामवचनः ॥ सव्याचाराश्चोकुरेव ॥ श्रीलपा

15

हस्तगलितार्घ्योदकान्निपितपात्रे प्रसिंच्य दक्षिणाग्रेषु कुशेषु पितृन्पयस्था
नमसीति पवित्रेन्युब्जं कृत्वा तस्योपर्यर्घ्यपात्रैः पवित्रादिकं क्षिप्त्वा पुष्पादि क्षिप्त्वा
तत्तात्रमासमाप्तेर्नैचालये मातामहेषु चैवमिति स्मृत्यर्थसारे॥ अत्र गंधपुष्प
धूपदीपवाससांच प्रदानं॥ अत्रावसरे विप्रेभ्यो गंधादिकं दद्यात्॥ गंधादी
नां स्मृत्यंतरोक्तविशेषो द्रष्टव्याः॥ चंदनकुंकुमकर्पूरागरुपत्रकान्यनुलेपना
र्थे॥ इति विष्णूक्तं॥ पुष्पे॥ पद्मोत्पलमल्लिकायूथिकाशतपत्रचंपकानि गंध
रूपसंपन्नान्यपि श्वेतानि॥ धूपे॥ घृतमधुसंयुक्तं गुग्गुलश्रीखंडागर
रसादि दद्यात्प्राप्यं गंसर्वं धूपार्थेन दद्यात्॥ दीपे शंखः॥ घृतेन दीपो दातव्यः
व्यस्तिलतैलेन वा पुनः। वसामेदोद्भवं दीपं प्रयत्नेन विवर्जयेत्॥ वस्त्रे॥ शुक्लं
कुंकुमहतं सदशं वस्त्रं दद्यात्॥ चकारोऽनुक्तसमुच्चयार्थः॥ लेनसक्तिसंप
त्तौ सचातिरिक्तेभ्योन्यदपि दातव्यं॥ तथाचावापुष्पताप्ये॥ लोके श्रेष्ठतमं स

स्मि त्र

सर्वमात्मनश्चापि यत्प्रियं॥ सर्वं पितृणां दातव्यं तद्देवाक्षयमिच्छतेति॥ यज्ञोपवीत
योदद्यात्प्राङ्मुखो द्विजो॥ धर्मवित्॥ पावनं सर्वविप्राणां ब्रह्मदानस्य तत्फलं॥ दानं चापि
तत्संप्रदानकं॥ प्रतिपत्तिस्तु ब्राह्मणेषु॥ अत्र यद्यपि गंधपुष्पधूपदीपाच्छादना
नां मिलितानां प्रदानं प्रतीयते॥ तथापि स्मृत्यंतरदर्शनात् धूपादीनामेकैकं देवादि
मातामहांतेभ्यः पृथक् दातव्यं॥ तथा च छंदोगपरिशिष्टे गंधोदकं च दातव्यं सन्नि
कर्षक्रमेण तु॥ गंधान् ब्राह्मणसात्कृत्वा पुष्पाण्यृतुभवानि च॥ धूपं चैवानुपू
र्व्येण अग्नौ कुर्यात्ततः परमिति॥ यज्ञोपवीतदानं वा॥ अलंकारमनु तेभ्यः यज्ञोप
वीतं प्रदद्यादिति स्मृत्यर्थसारे॥ अस्मिन्नवसरे ब्राह्मणाग्रेभ्यो तेन भाजनानि
निधाय मंडलानि कुर्यात्॥ अत्र मंत्रः॥ चतुष्कोणं द्विजाग्र्यस्य त्रिकोणं क्ष
त्रियस्य तु॥ मंडलाकृतिवैश्यस्य शूद्रस्याभ्युक्षणं स्मृतमिति॥ ब्रह्मपुराणे
मंडलानि च कुर्वाणि नैवारे शूर्णकैर्भैः॥ गौरमृत्तिकया वापि प्रणीतेन च
भस्मना॥ प्रणीतं चाऽवसथ्याग्निस्तदाने च भस्मना॥ तत्र मंत्रः॥ यथा चक्रा

(18)

पुष्पो विष्णुस्तस्मै लोक्यंपरिरक्षति॥ एवमंडलभस्मैतस्सर्वंभूतानिरक्षतिविति॥ इतिगदा
धरभाष्ये द्वितीयखंडिका॥ ॥ उध्दृत्य घृतात्मम त्रं पृच्छस ग्नौ करिष्य इति॥ ॥ वैश्वदेवा
दन्नादुध्दृत्य घृताक्तमन्नं घृतप्लुतमन्नं पात्रांतरे कृत्वा ततः पृच्छ सग्नौ करिष्ये इत्यने
नमंत्रेण॥ प्रश्नस्य रूपनिर्देश्यं तदर्थ इति कार ः अतश्च पर्यायांतरेण प्रश्नाभावः॥ घृ
तात्मिमितिनिष्ठाभूतेर्थे॥ ततश्चाधिश्रितस्यैवाभिघारणं॥ तथाच॥ श्रुतिः॥
त मूत्र पयतितस्मिन्नग्नौ श्रित आज्यंप्रयानयग्नौ वेदेवे जुहुयात्कुर्यादितिमनु
ष्ये भ्योऽप्येवंपितृणामितिपिंडपितृयज्ञे हेतेनुपन्यासात्॥ पितृत्वस्यात्रापितु
ल्यत्वात्॥ घृताक्तग्रहणं सूपशाकादानिविसर्प्य॥ तथाच विष्णुपुराणे॥ जुहु
योद्धं जनक्षारवर्जमितिकुरुष्वेसनुज्ञातः पिंडपितृयज्ञवध्दृत्वाहुतशेषं दत्वा
पात्रमालभ्य जपातिपृथ्वीवी॥ तेपात्रंद्यौरपिधानंब्राह्मणस्यमुखे मतं जुहो
मिस्वाहेति॥ ततः पश्चिमस्वधान्येन सर्वेण वाकुरुष्वेसनुज्ञातः पिंडपितृयज्ञवध्दृ
त्वाहुतशेषं ब्राह्मणाभोजनेलुप्तात्पात्रमालभ्य समंतात्॥ स्पृष्टा पृथ्वीवी

तेऽग्निमंत्रं जपेत्॥ पात्रमालभ्य जपः॥ जलमंत्राते आलभेत्॥ पात्रोद्देशमानत्वात् प्रति
पात्रमालंभनं॥ पिंडपितृयज्ञवदुपचारः स्यनेन पिंडपितृयज्ञातिदेशः श्चोक्तः॥ पुनः
पिंडपितृयज्ञमहापांपरिस्तरणादिपदार्थोनिवृत्स्यर्थं द्रष्टव्यं॥ होममात्रस्यातिदेशा॥
स्वाय मग्नौकरणहोमः॥ साग्निनावसथ्येग्नौ कर्तव्यः॥ तथा च याज्ञवल्क्यः॥ कर्मस्मा
र्तं विवाहाग्नौ कुर्वीत प्रत्यहं गृही॥ दायाद्कालाहृते चापि श्रौतं वैतानिकाग्निषु इति॥ स्मात
मंत्राहुतं दं॥ अतेग्नौकरणहोम आवसथ्ये भवति॥ न च प्रकृतिविकृतिभावेनास्य
श्रौतत्वं॥ कार्यातिदेशात्॥ स्वरूपातिदेशोऽतु पुनरिति कर्तव्यतामात्रमेव माप्नुयात्॥ अ
तस्मार्तत्वादावसथ्याग्नावेव होमः॥ आहिताग्निस्तु जुहुयाद्दक्षिणाग्नौ समाहित इति
यन्मार्कंडेयवचनोक्तं तत्सर्वाधानपक्षे ज्ञातव्यं॥ आहृत्य दक्षिणाग्निं तु होमार्थं लौ
किकं वापि जुहुयात् कर्मसिद्धये इति वायुपुराणीयमपि औपसथ्याहरणपक्षे वेदितव्यं॥
अन्यभावे मनुराह॥ अग्न्यभावे तु विप्रस्य पाणावेवोपपादयेत्॥ यो ह्यग्निः स द्विजो विप्रैर्मं
त्रदर्शिभिरुच्यते इति॥ कात्यायनः॥ पित्र्ये यः पंक्तिमूर्धन्यस्तस्य पाणावनग्निकः॥ कृत्वा

17

पिंत्रवदने षांतं च्छिं पात्रेषु निक्षिपेदिति ॥ द्विजाभावे मत्स्यपुराणे ॥ अग्न्यभावे तु वि
प्रस्य पाणौ वाप्यथ वा जले ॥ अजकर्णेऽश्वकर्णे वा गोष्ठे वाप्य शिवांतिके इति ॥ पाणिहोमप
पक्षे अनुज्ञावचनेन तत्स्तः प्रकृतित्वात् ॥ हुतशेषप्रदाने विप्रतिपत्तिः ॥ हुतशेषं दद्यादिति वि
शेषानुल्लेखत्साधारण्याद्दैवे पित्र्ये च देयमिति ॥ कर्काचार्यमतं ॥ कल्पतरुमिति हेमाद्रिमिता
क्षराकारणामते पित्र्ये एव ॥ एवं दुर्म यंसमूलं त्रापायनिः ॥ हुतशेषं पूर्ववद्दद्यात् श्र्या
द्धि पित्र्ये दद्यादिति ॥ यम ॥ अग्नौ करणशेषं तु पित्र्येषु प्रतिपादयेत् ॥ प्रतिपाद्य पितृ
णां तु न दद्याद्वैश्वदेविके इति ॥ धर्मप्रदीपे ॥ अग्न्यभावे तु विप्रस्य हस्ते हुत्वा तु दक्षिणे ॥
शेषं पैत्रित्वा विप्रार्थ्य पिंडार्थं शेषयत्नत इति ॥ पात्रमालभ्य जपतीत्यत्र पात्रस्य मन्त्रालं
भइतिकेचित् ॥ तदतीव मंदं यथा ॥ गार्ह्य समुत्तरेणोदपात्रं निधायालभनं इत्यत्र
कर्काचार्यैः पात्रालंभनं कृतस्त्वा अत्रापि पात्रालंभ एव ॥ ब्रह्मपुराणे ॥ विशेषः ॥ द
क्षिणं तु करं कृत्वा वामोपरि निधापयेत् ॥ दैवं पात्रं समालभ्य पृथ्वी तेपात्रमुच्चरन् ॥
दक्षिणोपरि वामं च पित्र्यपात्रस्यालंभनमिति ॥ पृथ्वीतेपात्रमित्यस्यार्थः ॥ हे अग्ने

करणाद्रोपलेतवपात्रं आघारप्रथिवीविन्याघारब्रूवदूलाविधानं योन्याघारं ।
त्वाअमर्तेजुहोरोष ब्राह्मणस्य मुखेजुहोमि ॥ क्लिं क्षदूषणे ॥ अमर्ते अव्यक्षणादिक्षि
रदूषतिमित्यर्थः ॥ ब्राह्मणस्य मुखे अग्निसदृशे त्वां अमर्तं जुहोमीति वाक्यार्थः ॥
ब्राह्मणस्याग्निसदृशत्वमाहापस्तंबः ॥ पितृरोत्र देवता ब्राह्मणस्याहवनीयार्थे इति ॥ वेछव्यची
ला यजुषां वो गुंछमन्त्रवर्गस्यापहता इति तित्रिकीर्य ॥ वाशब्दो विकल्पार्थः ॥ नियताक्षरपादाव
सना ऋचः ॥ अनीयताक्षरपादावसानं यजुरुच्यते ॥ अत्र ऋगिदं विष्णुः ॥ विष्णोर्हव्यं रक्षस्वे
ति यजुः ॥ इदं विष्णुरित्यन्योदृजांगुष्ठं निवेशयेदिति वचनात् ॥ तयोरन्यतरेण ब्राह्मण
भोजनीयस्थितेऽन्यद्विजांगुष्ठमन्नोमुखं नियेन्नपापहता इति मंत्रेण ब्राह्मणानामयंनो
न्नमावेशयतिलाभ्रकीरयेत् ॥ रक्षोघ्नत्वादुरक्षांसुरघ्ना इति ऋक् ॥ अविरोधादिति तेषामन्य
तथ ति केचित् ॥ स्वचतरे वरक्षोघ्नत्वात्तेषां परिवेषणमाह ॥ उक्त्वा स्विष्टमन्नं दद्यात् ॥ यावद्
घंभरे दन्नं तावद्देयं स्विष्टं आह्लपात्रप्रेतायकत्रे वारोचते ॥ अन्नं भक्ष्यभोज्यलेह्य
चोष्यपेयात्मकं पंचविधं ॥ यद्यपत्र सूत्रकृता सामान्ये नोक्तमन्नं दद्यादिति तथापि ॥

(8)

सप्तस्वंसत राहुविष्यं व्रीहिशालियवगोधूममुद्गमाषमुसन्नकालशाकंमुष्टोमरीचसिंगुडशार्करा कर्पू
रसैंधवसंभारपनसनारिकेळकदलीबदरगव्यपयोदधिघृतपायसमधुमांसप्रभृतीनिदद्या
त्॥ सप्तस्वंक्षेत्रगतं प्राहुः सत्तुषंधान्यमुच्यते॥ आमान्नं रितु बंद्रूषं पक्वमन्नं मुदाहृतमिति प
रिभाषितंणकेचित्॥ दन्नपक्वमेवमन्नमित्याहुः॥ परिवेषणं तु भाभ्यामपि हस्ताभ्यादायकुर्यात्
तदुक्तं मनुना॥ उभाभ्यामुपसंगृह्य स्वयमन्नस्य वर्द्धितमिति॥ विशेषमाह कार्ष्णाजिनिः॥ अपस
व्येन कर्त्तव्यं पित्र्यं कुर्यविशेषतः॥ अन्नादावाना दत्ते सर्वमेवं मातामहेष्वपीति॥ अपसव्येन य
त्स्वत्वं त्यागं ब्राह्मणेभ्यः प्रयच्छति॥ विष्टामश्नंति पितरस्तेत्वं सर्वे द्विजोत्तमाः इति॥ तदेतदानं परिवेषण
मेव॥ रामत्याव॥ विश्रामाभावे पदन्नं स्वत्वत्यागं दातुं शक्यते तं देयमित्यर्थः॥ अस्मिन्समये अ
न्नसंकल्पः कार्यः॥ तत्रैवं प्रयोगः॥ इदमन्नं यदन्नं यच्छ्रदास्यामपि तत्सर्वं परिवेषितं तत्सर्वं विश्वेभ्यो
देवेभ्यः स्वाहा॥ ततोऽमुकसगोत्रेभ्यो स्मत्पितृपितामहप्रपितामहेभ्यो मुकामुकशर्मभ्यो वसु
रुद्रादित्यस्वरूपेभ्यः॥ इदमन्नं यो दत्तं यच्चदास्यमानं परिवेषितं तत्सर्वं तेभ्यः स्वधेति मात
महानां मध्ये वं संकल्पं कुर्यात्॥ पद्यप्रत्र ब्राह्मणानां हस्ते उदकदानं आम्नातं नास्ति तथापि वा
क्यांतरसत्वात्कर्तव्यं॥ द्विजेभ्यः पर्युक्षणादि प्रागुक्तं संतोः सर्वस्य भोजनानि यमाविधेयः॥

केचलेऽत्र मौबलिहरणमेव न कार्यं ॥ तत्र बलिकरणे मन्त्रदोषश्रवणात् ॥ अथ ह्लत्य(?) ग्रंथे व्याकु
ति पूर्वांगायत्रीं सप्रणवां सव्याहृतिं वा एकवारमिति सकृत् वारत्रयमिति त्रिः अत्र सेरव्याभ्यु
क्षितः गणने थें द्वित्रिचतुर्भ्यः सुच इति सुचोपपादत्वेन त्रीत्यत्र सुचप्रत्ययः ॥ एकस्य सकृ
च्चेति सत्रेणैकस्य सकृदादेशः सुच् प्रत्ययश्चोक्तार्थे अथ तु आह्लणे बुव्या इति पूर्वांगाय
त्रीं सप्रणवां सकृत्त्रिर्वा राक्षोघ्नी पित्र्यमंत्रानुरूपस्तत्त्मयाति रथमन्याग्नि च पवित्राणि
जपेत् ॥ सांहितास्वरेण पठेत् ॥ तत्रायं क्रमः ॥ प्रणवं प्राङ्मुखं युंजीत व्याहृतिस्ततनंतरं ॥ सावित्रीं
चानुपूर्वेण ततो वर्णस्त्र मुच्चरेत् ॥ राक्षोघ्नीः कृणुष्व पाज इत्याद्याः पंचर्चः ॥ पित्र्यमंत्रा उदी
रतामवर इत्यादिकास्त्रयोदशर्चः पूरुषसूक्तं सहस्रशीर्षा इत्यादि षोडशर्चः ॥ अथ मन्ति
रथं आशुः शिशान इत्याद्याः सप्तदशर्चो द्वादशर्चो वा ॥ अन्याग्नि रुद्रसूक्तानी नि अग्नये
कव्यवाहनाय स्वाहेत्यादीन्यत्र मंत्रान् जपेत् ॥ अत्र जपस्य पदे शास्त्रान्तरबाध
नार्थः ॥ मनुः ॥ स्वाध्यायं श्रावयेत्पित्र्ये धर्मशास्त्राणि चैव हि ॥ इति ॥ मत्स्यपुराणेऽपि
शेषः ॥ [illegible] श्रुतमार्गं स्तोत्राणि विविधानि च ॥ इन्द्रसोमसूक्तानि पावमानीश्च

19

र्णित्विजः॥ बृहद्रथंतरं तद्वज्ज्येष्ठसाम सरौरवं॥ मंडलब्राह्मणं महत्संज्ञीति कारीचयसुन॥
विप्राणां मासनश्चैव न लक्षं समुदीरयेत्॥ इंद्रादि स्वक्तानि ऋग्वेदे प्रसिद्धानि॥ पुनं तु
मेसाघाः पावमान्यः॥ त्वामिद्धि हवामहे इत्यस्यामृचि गीयते यत्तद्बृहत्साम अभिनत्वा
शूरनोनुमइति रथंतरं॥ मूर्द्धानं दिव इति ज्येष्ठसाम॥ पुनानः॥ सोमे ति गौरवं॥ ऋ
चं वाचमिति॥ वर्णाति क्रोध्यायः॥ यदेतन्मंडलं तपतीति सग्निरहस्ये मंडलब्राह्मणं
प्रसिद्धं॥ इयं पृथिवीति बृहदारण्यके मधुब्राह्मणं॥ महज्जपुराणे॥ यो विष्णुहृदयं
मंत्रैश्चाद्वेषु नियतः पठेत्॥ पितरः स्तर्पितास्तेन पयसा चघृतेन च॥ चतुर्भिश्च च
तुर्भिश्च द्वाभ्यां पंचभिरेव च॥ हूयते च पुनर्द्वाभ्यां स मे विष्णुः प्रसीदतु॥ यस्य स्मृत्या
च नामुक्त्या तपो यज्ञक्रियादिषु॥ न्यूनं संपूर्णतां याति सद्यो वंदे तमच्युतमिति॥ ॥
विष्णुहृदयमंत्रः॥ आश्रावयेति च त्वारि च अक्षराणि अस्तु श्रौषडिति च त्वारि य
जेति द्वे॥ ये यजामहे इति पंच॥ वौषडिति द्वे॥ एतैर्यो हूयते तस्य स पुरुषो विष्णुर्यम

प्रसीदत्विति॥ एतदनुसारि शालपथेगाक्यं॥ तदेतच्चतुस्थायातथामोआरये स्यारभ्यओश्राव
येतिचतुरक्षरमस्तुश्रौषडिति चतुरक्षं यजेतिद्व्यक्षरं येयजामहइतिपंचाक्षरं द्व्यक्षरोव
षट्कारइति॥ उक्तजपासंभवे मत्स्यपुराणे॥ अभावे सर्वविद्यानां गायत्रीजपमाचरेदि
ति॥ तस्यानूक्ता तांत्रं प्रकीर्यत्स्त कहस्त कृपोदत्वा पूर्ववत्ता यत्रीजपित्वामधुमतीर्मधुमीव
तिच॥ मनुः॥ सर्वसावर्णिकमन्नाद्यं सन्नीयाप्लाव्यवारिणा॥ पदक्षिस्तेडुच्छवतामाग
तोविकिरान्भुवि॥ वृद्धस्पतिः॥ सोदकंविकरेदन्नं मंत्रंचेमंसमुच्चरेत्॥ अग्निदग्धा
श्चयेजीवा यप्यदग्धाः कुलेमम॥ भूमौ दत्तेनतृप्यंतु तृप्तायांतुपरांगतिमिति॥ तत्रेवं
सर्वमन्नमेकपात्रे कृत्वा भुविसतिलमुदकं निषिच्योत्सृज्य॥ ब्राह्मणानामग्रतोन्नं प्रकीरे
दिति कर्काचार्याः॥ पंक्तिमूर्धन्यस्योत्तरदक्षभागेअरत्निमात्रे विकिरंदद्यादितिहेमाद्रिः॥
तीर्थीत्रा द्रुम्पिकीराभावेः॥ सकृत्सकृदितिविप्रा ब्राह्मणापेक्षया॥ तेनवैश्वदेविकद्विजप
र्वकमेकैकस्यपाणौ तत्तरापोशानोर्ध्वसकृत्सकृद्दुद्यात्॥ पूर्वदितिप्रणवेनव्याहृति

क्षिप्य सर्वां गायत्रीं सकृत्त्रिर्वा जपेत्॥ मधुमतीरिति मधुवाता इति तिस्रः ऋच उच्यंते॥
मधुमध्विति चेति मधु मधु मधु इत्येवं त्रिरुच्चारणं कर्तव्यं॥ तृप्ताः स्थेति पृच्छति॥ ब्राह्मण
तृप्ताः स्थ इत्येवं ब्राह्मणान्प्रति पृच्छति प्रश्नं करोति॥ अत्र बहुवचनात् सर्वे प्रष्टव्याः॥
तृप्ताः स्म इत्यनुज्ञातः शेषमन्नमनुज्ञाप्य सर्वमन्नमेकतोद्धृत्योच्छिष्टसमीपे दर्भेषु
त्रीन्पिंडानवनेज्य दद्यात्॥ ततस्तैर्द्विजैः तृप्ताः स्म इत्यनुज्ञातः॥ शेषमन्नमनुज्ञा
प्य उर्वरितस्यानुज्ञाप्य ह्यपचितासर्वमन्नं सर्वप्रकारं माषान्नं वर्ज्यं पिंडपर्याप्तं एकत्र स्मन्या
त्रे उद्धरेत्॥ दर्भेषु त्रीस्त्रीन्पिंडान्निदध्यात् दर्भग्रहणं उपमूलसकृदाच्छिन्नोपलक्षणार्थं॥
त्रीस्त्रीनिति वीप्सा लामहाभिप्रायेण॥ पिंडपितृयज्ञवदुपचार इति स्मृत्यंतरवादत्र पिंड
पितृयज्ञवत्पिंडदानं॥ तेनोल्लिखन्त्यपहता इति परेणोल्मुकं परस्तात्करोति या
रम्यवपुस्फुत्तरे यजमानलोमानि वेष्यंते तैलेन्यते॥ अत्राह याज्ञवल्क्यः॥ सर्वम
न्नमुपादाय सतिलं दक्षिणामुखः॥ उच्छिष्टसन्निधौ पिंडान्दद्याद्वै पितृयज्ञवदि
ति॥ अत्र पदार्थक्रमः॥ उल्लेखनं॥ उदकालेपनं॥ उल्मुकनिधानं॥ अवनेजनं॥ सकृ

दाच्छिन्नास्तरणं॥पिंडदानं॥अत्र पितरइत्यृक्सूक्ते क्रोदंशतमनं॥आवस्यजपः॥पुनर
वनेजनं॥नीविविसर्गः॥नमोवइति षंनमस्काराः॥सूत्रेदानं॥सप्तऋचं॥पुरुजनं इति
क्रमः॥आचांतेष्विसे॥एके आचार्या आचांतेषु ब्राह्मणेषु पिंडदानमिच्छंति॥आचां
तेषु उदकं पुष्पाण्यक्षतान्नक्षय्योदकं दद्यात्॥ब्राह्मणेषु दत्ताचमनेषु सत्कृतेष्वयुद
कादिकं च दद्यात्॥पुष्पाणि चात्र निषिद्धानि॥पद्मोत्पलमल्लिकायूथिकाकुशपात्राणि
चंपकार्च्यानि गंधरूपसंपन्नानान्यपि दद्यात्॥तत्रापि प्रयोगः उक्तः संदोगपरिशिष्टे॥
तथात्र वस्त्रमिमा सिंचेत् ऊर्जोक्षितमिति॥शिवा आपः संत्विति युग्मानेवोदकेन च॥
सौमनस्यपुष्पमस्त्विति पुष्पदानमनंतरं॥अक्षतं चारिष्टं चास्त्वित्यक्षतान्प्र
तिपादयेत्॥अक्षय्योदकदानं तु अर्घ्यदानवदिष्यते॥षष्ठ्येव नित्यं तत्कुर्यान्न
चतुर्थ्यां कदाचन॥युग्म॥तिलैव द्विपरं॥प्रकुर्याणात्॥पित्राद्युल्लेखवाक्यावा
ग्रस्तेप्रक्षेपमात्रस्याविध्यानादिदत्तलादित्रिवृं दैवेपित्र्ये च कार्यं च॥यज्ञोपवीत
नादेयमिति शंखधराचार्याः॥तथा शातातपोपि॥तथा पुष्पाणि सर्व्येनोदकं

निरूप्यकूपर्थ्यामिति ॥ इदं जलादिदानं दैवे सव्येन पित्र्ये चापसव्येनेति कर्काचार्याः ॥ हस्ते
प्रतिपादितानामेषां चिरधारणे पयोधारारा भावाच्छुचौ देशे स्थापनमेव ॥ पुष्या
णां त्यत्र ब्राह्मणाः यजमानायाशिषं प्रयच्छंति ॥ मत्स्यपुराणे ॥ आचांतेषु पुनर्दद्याज्जलपुष्पाक्षतोद
कं ॥ दत्वाशीः प्रतिग्रह्यो याद्विजेभ्यः प्राङ्मुखो द्विजः ॥ अक्षय्योदकशब्देन दत्तान्नपानदेवानां स्या
त्प्रार्थ्यं न संबंधी जलमभिधीयते ॥ तच्चपितृब्राह्मणेभ्यः इति कर्कः ॥ सर्वेभ्यो दद्यादितिस्मृत्य
र्थसारे ॥ अघोराः पितरः संत्वित्युक्ते गोत्रं नो वर्द्धतां वर्द्धतामित्युक्ते दातारो नोभिवर्द्धतां वेदाः
संततिरेव च ॥ श्रद्धा च नो मा व्यगमद्बहुदेयं च नोस्त्विति ॥ आसीः प्रार्थनं प्रपंचयंती ॥ तत्र य
जमानः अघोराः पितरः संत्विति ब्रूयात् ॥ ब्राह्मणाश्च संत्विति ब्रूयः ॥ ते स्तथोक्ते यजमानो
वर्द्धतामिति आह ॥ ब्राह्मणाश्च वर्द्धतामित्युक्ते दातारो नोभिवर्द्धतामिति ब्रूयात् ॥ द्विजै
र्वर्द्धतामित्युक्ते कर्त्ता वेदाः वर्द्धतामिति ब्रूयात् ॥ वर्द्धतामित्युक्ते संततिर्वर्द्धतां यजमा
नः ॥ वर्द्धतामिति ब्राह्मणाः ॥ श्रद्धा च नो मा व्यगमत् ॥ इति यजमानः ॥ मागादिति ब्रा
ह्मणाः ॥ बहुदेयं च नोस्त्विति कर्त्ता ॥ अस्त्विति ब्रूयुः ॥ अत्र मनुराह दक्षिणां दिशमाकां दि

न्याचेते मा च रानू पितॄनू इति ॥ आशिषः प्रतिगृह्य स्वधां वाचनीयानू सपवित्रान् कुशानास्तीर्य
स्वधां वाचयिष्य इति पृच्छति ॥ उक्तप्रकारेणाशीर्ग्रहणं कृत्वा स्वधांवाचनीयसंज्ञकानू सपवित्रानु कु
शानास्तीर्य वीऽ समीपभूमौ स्व त्वा स्वधां वाचइष्येति पंक्तिमूर्धन्यं सर्वानू वा पृच्छेत् ॥ सपवि
त्रानू साग्रानित्यर्थः ॥ न्युब्ज पात्रो परिस्थित पवित्राण्यर्घपवित्राण्यन्यप विप्रैः स हमानीय पिं
डानां पश्चिमतो दक्षिणाग्राणि निधाय स्वधां वाचयिष्य इति पृच्छेत् ॥ इति हेमाद्रिः ॥ सकु
शानि पवित्राणि पिंडानामुपर्यास्तीर्य स्वधां वाचयिष्य इति पृच्छेदिति देवयाज्ञिकः ॥ ॥
वाच्यतामित्यनुज्ञातः पितृभ्यः पितामहेभ्यः प्रपितामहेभ्यो वृद्धप्रमातामहेभ्यश्च स्वधोच्य
तामिति ॥ ततस्ते द्विजैर्वाच्यतामित्यनुज्ञातः पितृभ्य इत्यादि स्वधोच्यतामित्येवं मंत्र
मुदारयेत् ॥ अस्तु स्वधेत्युच्यमाने स्वधावाचनीयेष्वपो निषिंच्य ऊर्जमिति ॥ अ
स्तु स्वधेत्युच्यमाने सति स्वधावाचनीयेषु दर्भेषु निषिंच्य ऊर्जमित्यनेन मंत्रेण ॥
आसेचनमध वचनयोगान्नामंगां गीभ्माव: ॥ अवसरनिर्देशाच्छोन च ॥ अतो वृद्धिश्रा
द्धेपि भवति ॥ मंत्रश्चायं समवेतार्थः ॥ अतोऽस्य मातृश्राद्धे मातृभ्यः पितामहीभ्यः इत्या

घृ १९॥ संख्यासमवेतार्थः॥ अतश्चैकोद्दिष्टेनोहः॥ उत्तानं पात्रं कृत्वा यथाशक्ति दक्षि
णां दद्याद् ब्राह्मणेभ्यः॥ अर्घ्यानंतरं यत्पात्रं न्युब्जीकृतं तदुत्तानमूर्ध्वमुखं कृत्वा यथा
शक्ति दक्षिणां दद्यात्॥ शक्तिमनतिक्रम्य यथाशक्ति। अत्र गौतमश्रुतिः॥ स एष
यज्ञो हतो न ददते देवा दक्षिणाभिरदक्षयंस्तद्यदेनं दक्षिणाभिरदक्षयंस्तस्माद्द
क्षिणा नामेति॥ स्मृतौ॥ गोभूहिरण्यवासांसि कन्याभवनभूषणं॥ दद्याद्यदिष्टं वि
प्राणां मात्मनः पितुरेव चेति॥ अदक्षिणं श्राद्धं च न कुर्यात्॥ तथा च श्राद्धकल्पे॥ न
कुर्याद्दक्षिणाहीनं दैवे श्राद्धमदक्षिणमिति॥ तथा च गौतमब्राह्मणे॥ तस्मान्नो
दक्षिणं हविः स्यादिति॥ विश्वे देवाः प्रीयंतामिति दैवे वाचयित्वा वाजे वाज इत्य
नया विसृज्य॥ वाचयितिकारितत्वाद्ध्येषणाभवति॥ विश्वे देवाः प्रीयंतामिति
ब्रूहीति॥ दैवब्राह्मणाश्च विश्वे देवाः प्रीयंतामिति ब्रूयुः॥ ततो वाजे वाज इति
मंत्रेण विप्रान्विसर्जयेत्॥ विसर्जनं मुपित्र्यपूर्वं॥ तथा च याज्ञवल्क्यः॥ वाजे

वाज इति प्रीतः पितृपूर्वं विसर्जयेदिति ॥ निमंत्रणादिषु दार्थजातं देवपूर्वं भव
ति ॥ विसर्जनं तु पितृपूर्वमिति मेधातिथिः ॥ देवतोऽपि ॥ पूर्वमुख्यापयेत् सितृप्तून्न्या
च्यतामिति च ब्रुवन् ॥ उच्छिता न तु गच्छेत् तेभ्यः शेषं च संहरेत् ॥ पश्चात्तु वैश्वदे
विकान् विप्राननुत्थापयेत्तथा ॥ एते हि पूर्वमासीनाः समुत्तिष्ठंति पश्चिमा इति ॥ आ
मा वाजेस्यनुव्रजेत् प्रदक्षिणीकृत्योपविशेत् ॥ आमा वाजस्येति मंत्रेणानुव्रज्या
नु पश्चाद्द्विजास्सीमांतं व्रुगत्वा स्वगेहं प्रविशेत् ॥ ॥ इति गदाधरभाष्ये तृतीयकं
डिका ॥ ॥ अथ प्रयोगपद्धतिः ॥ तत्र कालाः ॥ अमावास्याष्टकावृद्धिः कृष्णपक्षो
यनद्वयं ॥ विषुवत्सूर्यसंक्रमो व्यतीपातो गजच्छाया ग्रहणं युगादिमन्वादय
श्च तथा विशिष्टे देशे गयादौ विशिष्टे काले च महतां हादौ द्रव्यब्राह्मणसंपत्कौ चा
त्मरुचिश्चेत्याद्याः कालाः ॥ अथ श्राद्धाधिकारनिर्णयः ॥ प्रमीतयोः पितृमुख्य
गौणाश्च पुत्रोः श्राद्धकृत्पुत्रः तदभावे दायादः ॥ पौत्रपुत्रिकापुत्रौ वा ॥ तदभावे सहोद

रास्त स्तं तन्निर्वातदभावेतु गोत्रिताः तदभावेन्यस्याः सुहृदश्च कुर्युः॥ सर्वाभावे न्टपतिः स्व
ज्ञातीयैः कारयेत्॥ न्टपतिः सर्ववर्णानां बांधव इति स्मरणात्॥ ब्रह्मचिं यात् होजा साध्वी चेत्पु
त्राभावे पंत्स्यो वाधिकारिणी॥ यदिन्क्र यकिता न भवति॥ क्रयक्रिता तु या नारी न सा पत्नी
विधीयते॥ न सा दैवे न सा पित्र्ये दासीं तां कवयो विदुः॥ सर्वाभावे तु चौलश्चे दमंत्रकं श्रा
द्धेधिकारः॥ एक एवश्चे सुत्र स्तदा सावनुपनीतोपि कृत चौलश्चे दमंत्रकं श्राद्धं कुर्यात्॥
अपुत्रायाः पतिर्दद्यात्स्त्र पुत्रायाश्च न कश्चित्॥ पित्राश्राद्धं न कर्तव्यं पुत्राणां च न मे
दाचन॥ भ्रातृणां नैव कर्तव्यं भ्रातॄणां च कनीयसां॥ अपि स्नेहेन कुर्याच्चेत्स पीडी
करणं विना॥ गयायां तु विशेषेण ज्याया नपि समाचरेत्॥ धनहारित्वादिनियमा
भावेपि प्रीत्या यस्य कस्यापि वर्णस्य श्राद्धे कृते महत्पुण्यमाह॥ शातातपः॥ प्रीत्या
श्राद्धं तु कर्तव्यं सर्वेषां वर्णलिंगिनां॥ एवं कुर्वन्नरः सम्यक् महती श्रेयमाप्नुयात्॥
ब्राह्मणो ह्यस वर्णस्य यः करोत्यौर्ध्वदेहिकं॥ तद्वर्णत्वमवाप्नोति इह लोके परत्र च॥

दौहित्रेण सपिंडीकरणादिव्यतिरेकेण यदा यदा पितुः श्राद्धं तत्तदा तदा मातामहश्राद्धं
कर्तव्यमेव ॥ पितरो यत्र पूज्यन्ते तत्र मातामहा अपि ॥ अविशेषेण कर्तव्यं विशेषान्नरकं
व्रजेत् ॥ तत्तित्यस्य व्यतिरिक्तविषयं ॥ अयं च एकोद्दिष्ट सपूर्व सुरातर्पणेन तत्रैव पश्चादन्व
ष्टक्यां त्रिपार्वणं सपिंडीकरणं च ॥ पुत्रश्चेन्न हारि दौहित्रः तेन सर्वरूपेण वश्राद्धं कार्यपि
कार्यमेव ॥ क्षयाहे तु एकं पार्वणमेव साग्निकानामेकोद्दिष्टं वा यो यत आददीत स तस्यै
व श्राद्धं कुर्यादिति स्मरणात् ॥ मातामहस्य नव श्राद्धं अवश्यं धनहारिणां दौहित्रेण का
र्य दौहित्रेणार्थनिःस्वं कर्तव्यं विधिवत्सदा ॥ आदेहपतनात्कुर्यात्तस्य पिंडोद
कक्रियां ॥ यस्तु वै बलं मातामहेन संबंधः पुत्रिकापुत्रः स मातामहस्यैव नित्य
म नश्राद्धं कुर्यात् ॥ पुत्रिकापुत्रश्राद्धे विशेषमाह ॥ मनुः ॥ मातुः प्रथमतः पि
डं निर्वपेत्पुत्रिकासुतः ॥ द्वितीयं पितुस्तस्यास्तृतीयं पितुःपितुः ॥ कामुष्या
यणे पुत्रिकापुत्रे ऽज्ञानसौ क्लो विशेषः ॥ ॥ मातामहत्वं तु मात्रादिपैतृकं पितृपूर्वकं

मातृतः पितृतो यस्मादधिकारोस्ति धर्मपितृ इति ॥ क्षेत्रजे तु द्व्यामुष्यायणे ॥ दैवलोक्ते
द्व्यामुष्यायणेकादद्युर्द्वाभ्यां पिंडोदकं पृथगिति ॥ द्वाभ्यां पितृवर्गाभ्यामित्यर्थः ॥ द्विपि
तुः पिंडदानं स्यात् पिंडे पिंडे द्विनामता ॥ षंण्णां मंत्रावृत्तयः पिंडाएकैकं तु क्षयेहनि
पोषकः प्रथमः ॥ ततो जनकः ॥ अत्र क्रमविशेषमाह मरीचिः ॥ स्वगोत्रो वान्यगो
त्रो वा यो भवेद्द्विपवासुतः ॥ पिंडश्राद्धं द्विधानं च क्षेत्रेणे प्राग्विनिर्वपेत् ॥ विपि
ने तु ततः पश्चात् क्षेत्री जीवति चेत्क्वचित् ॥ बीजिने दद्युरादेहे तु मृते पश्चात्स्वपी
यतइति ॥ जीवत्पितृकस्यापि क्वचित्क्वचित् श्राद्धाधिकारः ॥ यत्तु मैत्रायणीयप
रिशिष्टे विशेषो दर्शितः ॥ उद्वाहे पुत्रजनने पित्र्येष्ट्यां सोमकर्मणि ॥ तीर्थश्रा
द्धे आयाते षडेते जीवतः पितुः ॥ पुत्रस्य श्राद्धकाल इति शेषः ॥ जीवत्पितृ
कस्याप्रतिपाद्य मातामहश्राद्धं प्रशास्तिरायप्राप्तये नियमेन कार्यं ॥ जातमा
त्रोपि दौहित्रो मियमानेप्य मातुले ॥ कुर्यान्मातामहश्राद्धं प्राद्यपक्षाब्धि नेऽसतेइति ॥

अथ श्राद्धब्राह्मणलक्षणं ॥ तत्र महाभारते ॥ विद्यावेदव्रतस्नाता ब्राह्मणाः सर्व एव हि ॥ पां
क्तेयांस्तु प्रवक्ष्यामि ज्ञेयास्ते पंक्तिपावनाः ॥ त्रिणाचिकेतः पंचाग्निस्त्रिसुपर्णः षडंगवित् ॥
ब्रह्मदेयानुसंतानश्छंदोगो ज्येष्ठसामगाः ॥ मातापित्रोर्यश्च वश्यः श्रोत्रियो दशपूरु
षं ॥ ऋतुकालाभिगामी च धर्मपत्नीषु यः सदा ॥ वेदविद्याव्रतस्नातो विप्रः पंक्तिं पुना
तु ते ॥ अथर्वशिरसोऽध्येता ब्रह्मचारी यतव्रतः ॥ सत्यवादी धर्मशीलः स्वकर्मनिर
तश्च यः ॥ ये च पुण्येषु तीर्थेषु अभिषेककृतश्रमाः ॥ मखेषु च समंत्रेषु भवंत्यवभृ
थप्लुताः ॥ अक्रोधना ह्यचपलाः श्राद्धे पूज्यास्तु ते द्विजाः ॥ सर्वेन्नाहतायेच्च श्राद्धेचैता हीन
न्निमंत्रयेद्दाता ॥ यथोक्तगुणब्राह्मणाभावे किंचिन्न्यूनगुणा अपि वैश्वदेविकार्थं उपवेशनीयाः ॥
पित्र्ये तु यथोक्तगुणा एव भोज्याः ॥ तथा यां तु निर्गुणा अपि तत्र स्वजा एव द्विजा भोज्याः ॥
यथोक्तगुणाभावे मातामहमातुलस्वस्रीयश्वशुरदौहित्रजामातृत्विक्पुज्यशि
ष्याः अविगुणवंतश्चेच्छ्राद्धे भोजनीयाः ॥ अथैकस्यापि ब्राह्मणस्यालाभे अनुकल्पं

नरमुक्तं ॥ प्रभासखंडे ॥ अलाभे ब्राह्मणस्यैव कौशः कार्यो बटुः प्रिये ॥ एवमप्याचरेत् श्राद्धं बटुर्दैवं सं-
समाहितः ॥ विभक्तिं कारयेत्पल्लापि तहा समजायते ॥ कौशः कुशमयः ॥ बटुल्लघुमनुष्यप्रकृतिः ॥
तं बटुं ब्राह्मणत्वेन परिकल्प्य सर्वश्राद्धं समाचरेत् ॥ विभक्तिः कर्मणः छेदो लोप इति यावत् न
कुर्यात् ॥ तथा ॥ पात्राभावे विप्रविल्लुं कृत्वा पितृयज्ञविधिर्नरः ॥ निधाय वा दर्भबटुं नासनेषु समाहि-
तः ॥ प्रैषानुप्रैषसंयुक्तं विधानं प्रतिपादयेत् ॥ सर्वाभावे क्षिपेदग्नौ गवे दद्यादथाप्सु वै ॥ नैव श्राद्धस्य लो-
पोस्ति पैतृकस्य विशेषतः इति देवलः ॥ प्रैषानुप्रैषसंयुक्तमिति ॥ श्राद्धं संपन्नं सुसंपन्नमित्यादि
प्रश्नप्रतिवचने स्वयमेव वदेदित्यर्थः ॥ ॥ अथ नियमः ॥ मनोवाक्कर्मभिर्हिंसा निमंत्रितश्राद्ध-
णः परित्यागस्तांबूलक्षुरकर्माभ्यंजनदंतधावनपरित्यागश्च ॥ ॥ इति कर्तृनियमाः ॥ निमं-
त्रणमभ्युपगम्यानपक्रमणमन्यत्र भोजनमेकत्र निमंत्रितस्मान्येषामन्नादेरप्यायहरणं मातु-
लस्य कुतुपकालाद्यनतिक्रमणं ॥ ॥ इति द्विजनियमः ॥ निमंत्रणादुपरि श्राद्धव्यतिरिक्तभोज-
नं पुनर्भोजिनासत्यवदनाशौचमक्षवशितत्वं मनोऽस्वदारेषु पि निपुरुषस्यापि मैथुनाकरणं विशेषः ॥

क्षुद्धयाः परिहरणं श्रमस्वाध्यायाः । पाक्षोध्वं चौर्यं बलहमृतभारोद्वहनप्रतिग्रहश्रमाद्म
दमोहलोभाहंकारकार्पण्यस्तेयवर्ज्यं ॥ इत्यजयनियमाः ॥ अथ श्राद्धदिने प्राचीनदिन
वृद्ध्यं ॥ तत्र वृत्तोस्वगृहे निरामयं भुक्त्वा ब्राह्मणानिमंत्रणं प्रदोषांते वृद्धेरेति ॥ विष्णु
स्मरणं प्राणायामत्रयं कृत्वा पश्चोपवीती उदङ्मुखः ॥ प्राङ्मुखस्य द्विजस्य दक्षि
णं जान्वपस्पृश्य उं दैवे क्षणः क्रियतामिति वदेत् ॥ उं तथेति प्रत्युक्तिः ॥ प्राप्नो
ति भवानित्युक्ते प्राप्नवानीति प्रत्युक्तिः ॥ ततः अक्रोध्यनैरित्यादि श्रावयेत् ॥ एवं
मातामह विश्वेदेवे संबंधि निमंत्रणं ॥ प्राचीनावीती दक्षिणामुख उदङ्मुख
द्विजस्य दक्षिणं जान्वपस्पृश्य उं दैवे क्षणः क्रियतामिति वदेत् ॥ उं तथेति
प्रत्युक्तिः ॥ प्राप्नोति भवान इत्युक्ते प्राप्नवानीति प्रत्युक्तिः ॥ ततः अक्रोध्यनैरित्यादि
श्रावयेत् ॥ एवं मातामह विश्वेदेव संबंधि निमंत्रणं ॥ ततः प्राचीनावीती
दक्षिणामुख उदङ्मुख द्विजस्य दक्षिणं जान्वपस्पृश्य उं अमुकगोत्रस्यामु

कुर्यान्मेणोस्मातिलुः सपत्नीवृत्स्य श्राद्धे भूपाः क्रियतामित्यादि ॥ एवमयं पितुरयं पिताम
हस्यायं प्रपितामहस्येत्यादि तिर्यक्परं वृत्यामातामहद्विजान्निमंत्रयेत् ॥ यावत्संख्या
श्च पितृद्विजास्तावत्संख्याय एव मातामहद्विजास्तथैव निमंत्रणीयाः ॥ ततोऽक्रोध
नैः शौचपरैः सततं ब्रह्मचारिभिः ॥ भवितव्यं भवद्भिश्च मया च श्राद्धकर्मणि ॥ इ
ति नियमानुश्रावयेत् ॥ मंत्रेण वा वैश्वदेविकं ॥ इति श्राद्धदिनात्पूर्वदिनकृ
त्यं ॥ पूर्वदिने आमंत्रणासंभवे श्राद्धदिने प्रातर्निमंत्रणं ॥ अथ श्राद्धदिनकृत्यं ॥
तत्र दंतधावनवर्जं प्रातःकालीनं कर्म कृत्वा उद्वर्तनकृत्यस्नानी पतिस्त्याच्चलोत्र
ताम्रपात्रे संभृतान् वृंतन्मम्श्रन्नरवेभ्यो निमंत्रितद्विजेभ्यो दैवपूर्वं दं प्रेष्यद्वा
रा दापनं ॥ ततः पाकभूमौ गोमयोपलेपनादिकं संस्कारं कृत्वा महानसे च ॥ सचे
लस्नातः सपत्नीको यजमानः स्वयं पाकमारभेत ॥ असंभवे तु बन्धुभिः स्नातैः ॥
सवर्णैर्वा कारयेत् ॥ ततः श्राद्धसंभारोपकल्पनं ॥ अथाह्नः षष्ठमुहूर्ते न्ययादेने
स्नानं ॥ ततः कर्मांगस्नानं ततः श्राद्धार्थं मुहूर्तमानीय पत्न्या सह शुचिः शुक्लवासाः

श्राद्धदेशमागत्योदकं स्थापयेत्॥ अथापराण्हकृत्यं॥ तत्रागतान् द्विजान् दृष्ट्वा भवतां स्वागत-
मिति प्रत्येकं ब्रूयात्॥ सुस्वागतमिति द्विजैर्वक्तव्यं॥ ततस्तेभ्य उदकदानं। मंडलकरणं। आच-
मनार्थजलदानं॥ तेष्वाचमनकरणं॥ ततो यजमानस्य पादप्रक्षालनपूर्वकं द्विराचमनं। ब्रा-
ह्मणानुपवेशनं॥ अस्मिन्नवसरे दीपानां स्थापनं॥ ततः कर्तोपविश्य॥ गयायैन मः गदाधराय न-
मः इति वदेत्॥ पुंडरीकाक्षं स्मृत्वा देवताभ्यः पितृभ्यश्च महायोगीभ्य एव च॥ नमः स्वाहायै स्व-
धायै नित्यमेव नमो नमः इति त्रिः पठेत्॥ ततः अद्येत्याद्दिकालज्ञानं कृत्वा मुकगोत्राणां मस्म-
त्पितृपितामहप्रपितामहानां सपत्नीकानां वसुरुद्रादित्यस्वरूपाणां तथा मातामहादीनां
संकीर्तनं कृत्वा पार्वणैकद्दयविधिनामुकनिमित्तं श्राद्धं करिष्ये इति संकल्पं कुर्यात्॥ ततो नि-
हन्मि सर्वं यदमेध्यवद्भवेत् हतास्सर्वेपि दानवासुराः॥ यक्षांसि रक्षांसि पिशाच गु-
ह्यकाः हता मया यातुधानाश्च सर्वे इति पठेत्॥ निविबंधनं॥ ततस्तिलान्रक्षार्थं वसुराज्ञा दे-
र्भोरक्षंतु राक्षसान्॥ पंक्तिं वै श्रोत्रियोरक्षेद्द्वितिथिः सर्वरक्षकः॥ इति द्वारेतिलकुशान्निक्षिपेत्।

अग्निष्वात्ताः पितृगणाः प्राचीं रक्षंतु मे दिशं॥ तथा बर्हिषदः पांतु याम्यां ये पितरस्तथा॥ प्रतीची
माज्यपास्तद्वदुदीचीमपि सोमपाः॥ ऊर्ध्वं तु स्वयं मा रक्षेत् क्रव्यवालनलेश्वरः॥ रक्षोभूतपिशाचेभ्य
स्तथैवासुरदोषतः॥ सर्वतश्चाधिपस्तेषां यमो रक्षां करोतु मे॥ इति यथालिंगं दिशि दिशि तिलाव
कीरयेत्॥ रक्षोभूतेति सर्वतः प्रकीरणं॥ ततः क्रमार्थं जलाभिमंत्रणं॥ दर्भैराछाद्य तु यद्देवा इति
मंत्रेण॥ अत ऊर्ध्वं जलकार्यमनेन॥ इष्टदृष्टिनिपातनादिदूषितः पाकः पूतो भवत्विति पाकप्रो
क्षणं सव्यं॥ पूरूरवाद्रवसंज्ञकानां विश्वेषां देवानां इदमासनं॥ अपसव्यं॥ गोत्राणां पितृपिताम
हप्रपितामहानां अमुकामुकशर्मणां मिदमासनं॥ एवं मातामहादीनां॥ सव्यं पुरूरवाद्रवसं
ज्ञकान् विश्वान् देवानावाहयिष्ये इति प्रश्नः॥ आवाहयेति प्रत्युक्तिः॥ दक्षिणजानुमालभ्य वि
श्वेदेवास आगत इत्यावाहनं॥ यवविकीरणं॥ विश्वेदेवाः शृणुतेमं मितिजपः॥ आगच्छंत्विति जपेत्॥
अपसव्यं अमुकगोत्रान् पितॄनावाहयिष्ये इति प्रश्नः आवाहयेति प्रत्युक्तिः उशंतस्त्वेत्या
वाहनं तिलप्रकीरणं॥ आयंतु न इति जपः॥ एवं मातामहादीनां आवाहनं॥ ततः सव्येन सं

वैश्वदेविकं पात्रं निधाय पवित्रांतर्हिते शन्नोदेवीरिति जलमासिंच्याप सव्यं कृत्वा
पितृपात्राणि निधाय पवित्रांतर्हितेषु शन्नोदेवीरिति जलासेचनं ॥ सव्यं ॥ यवोसि धान्य
राजोसि वारुणो मधुसंयुत ॥ निर्णोदः सर्वपापानां पवित्रमृषिभिः स्मृतः इति ॥ दे
वपात्रे यवप्रक्षेपः ॥ यवोसि यवेति मंत्रेण यवप्रक्षेपः ॥ तिलप्रक्षेप तिलोसीति मं
त्रेण ॥ तिलोसीति पितृपात्रेषु मंत्रावृत्त्या तिलप्रक्षेपः ॥ सर्वपात्रे चंदनपुष्पप्रक्षे
पो देवपितृधर्मेण ॥ सव्यं ॥ वैश्वदेविकपवित्रदानं ॥ पूजनं ॥ यादिव्याइत्यर्घ्यदानं ॥
एवं सर्वत्र प्रथमे पात्रे संस्रवान् समवनीय पितृभ्यः स्थानमसीति तत्पात्रं न्युब्जी
करणं ॥ तदुपरि कुशान्निधानं ॥ पुत्रेक्षामामभ्येतसं छववंदनं ॥ आपः शिवाइति ॥
ततो गंधादिदानं ॥ तत्रैव ॥ सव्यं ॥ पश्चाद् तं गंधाद्यर्चनं पुरूरवार्द्रवसंज्ञकेभ्यो
विश्वेभ्यो देवेभ्यः स्वाहा ॥ अपसव्यं कृत्वैवं पितृभ्यो दानं ॥ आचमनं प्राणाया
मः ॥ आस्तरणाग्रे भाजनानि निधाय पञ्चकप्रकारेण मंडलानि कुर्यात् ॥ अपसव्यं ॥

अत्र मुख्यस्य अग्नौ करिष्य इति प्रश्नः॥ कुरुष्वेति प्रत्युक्तिः॥ अग्नये कव्यवाहनाय स्वाहा॥ सोमाय पितृमते स्वाहेति होमद्वयं कुर्यात्॥ इदमग्नये कव्यवाहनाय न मम सोमाय पितृमते न ममेति द्वयोस्त्यागो स्वयं कृतश्चेत्त्यागाभावः इतिहेमाद्रिपद्धतौ॥ हुतशेषं पात्रे दत्वा पात्रमालभ्य जपः॥ पृथिवी ते पात्रं तेन त्रारत्निः॥ वैष्णव्यर्च्या यजुषा वांगुष्ठमन्नेवगाहनं॥ तिलविकिरणं॥ परिवेषणं॥ संकल्पपूर्वोक्तप्रकारेण॥ सकृत्सकृद्दुदकदानं॥ विप्रहस्तेषु॥ ततः अन्नेत्यक्तजपो यथ्योक्तः॥ ततस्त्यानोक्तप्रकारेण॥ अन्नप्रविकिरणं आचमनं॥ सकृत्सकृद्दुदकदानं पूर्ववत्‌ गायत्री जपः॥ मधुवाता०॥ भवंतु नः॥ मधु मधु मधुरिति जपेत्॥ तृप्तास्थ्येति प्रश्नः तृप्ताः स्मइति प्रत्युक्तिः शेषमन्नमप्यस्तीति ब्रूयात्॥ इष्टैः सह भुज्यतामिति प्रतिवचनं॥ हेमाद्रिणा तु कर्मान्ते पिंडार्थमुपयुज्यतामिति प्रयोगो दर्शितः॥ सर्वमन्नमेकतो दूरणं॥ उल्लेखनमपहता इति साग्निकस्य वज्रेण॥

इतिप्रति

इतरस्यतु कुशमूलेनाञ्जलस्पर्शः॥ अग्निमतउल्मुकं निधानं॥ प्रतिपार्वणं

अमुकगोत्रपितरमुकशर्मन्॥ अवनेजनं एवंपितामहप्रपितामहयोः॥ स

कृदाच्छिन्नास्तरणं॥ अमुकगोत्रपितरमुकशर्मन्नेतत्तेऽन्नःस्वधेतिपिंडदा

नं॥ इदमनुलेपनमम॥ एवमुभयमन्त्रा॥ सर्वत्रमातामहानामप्येवमेवविध्ये

यं॥ अत्रपितरं इत्युदङ्मुखआउदकूलात मनं॥ आवृत्यामीमदंतेतिजपः॥ पूर्ववद्वनेजनं

नीवीविसर्गः॥ नमोवइतिषडंजलीकरणं॥ एतद्वइतिसूत्रदानं॥ पंचरोदर्शाहूर्ध्वेंय

जमानहृदयलोम्नांवादानं॥ पिंडपूजनं॥ चंदनपुष्पधूपदीपनैवेद्यानिगोत्रेभ्यः

पितृपितामहप्रपितामहेभ्यः स्वधेति॥ एभिःपिंडदानैरस्मत्पितृणामक्षय्यतृप्तिरस्त्वि

हलेन्द्राक्षयभवतु॥ इतिप्रार्थना॥ आचमनं॥ सुप्रोक्षितोयं प्रदेशो ख्यितिजलेनभूमि

सिंचेत्॥ शिवाआपः॥ संख्यिस्यदकदानं॥ अमुकगोत्रस्यपितुः अमुकगोत्रशर्मणेद

त्तंश्राद्धमुदकंचाक्षय्यमस्तु॥ एवंपितृपितामहप्रपितामहेभ्यो॥ ततोद्विजानां

प्रार्थना॥ येषामुद्दिष्टं तेषामक्षयमस्तु॥ अक्षितिप्रस्कन्दि॥ अघोराःपितरःसंतु

॥पितामहेभ्यः स्वधोच्यतां प्रपितामहेभ्यः स्वधोच्यतां मातामहेभ्यः स्वधोच्यतां प्रमातामहेभ्यः स्वधोच्यतां

स्त्विति प्रत्युक्तिः गोत्रं नो वर्द्धतामिति प्रश्नः॥वर्द्धतामिति प्रत्युक्तिः॥दातारो नोभिवर्द्धंता
मिति प्रश्नः वर्द्धंतामित्युक्तिः॥वेदाः वर्द्धंतामिति प्रश्नः वर्द्धंतामित्युक्तिः संततिर्वर्द्धतां वर्द्धंता
मित्युक्तिः श्रद्धा च नो मा व्यगमत् माऽगादिति प्रत्युक्तिः बहुदेयं च नोस्तु अस्त्विति प्रत्युक्तिः
पात्रोपरिस्थापितकुशानां भुमौ आस्तरणं॥ततः स्वधां वाचयिष्ये इति प्रश्नः
वाच्यतामित्युक्ते पितृभ्यः स्वधोच्यतां वृद्धप्रमातामहेभ्यः स्वधोच्यतामिति मंत्रं पठेत्॥
अस्तु स्वधेति प्रत्युक्ते आस्तृतकुशेषु ऊर्जमित्युदकासेकः॥पात्रोत्तानकरणं॥ततो स्यश्रा
द्धस्य प्रतिष्ठासिध्यर्थं दक्षिणा मुखवासतांबूलं च विश्वेभ्यो देवेभ्यः स्वाहा॥इदं न
मम॥अस्य श्राद्धस्य प्रतिष्ठासिध्यर्थं दक्षिणां मुखवासतांबूलं चामुकगोत्रेभ्यः
इत्यादि न मम मेति संप्रयागः॥विश्वेदेवाः प्रियंतामिति वदेत्॥प्रियंतामिति प्रत्युक्तिः
विश्वेदेवाः शांतिदा पुष्टिदा वरदाश्च वं तु भवंत्विति द्विजाः अन्नं च नो बहु भवेत् बहु
भूयात्॥अतिथिंश्च लभेमहि॥लभध्वं याचितारश्च नः संतु॥संतु मा च याचिष्म
कं च मा याचेष्मा॥एता एवाशिषः संतु इति प्रार्थना स्वयमेव तिलत्रूर्करणं पिंडदानं प्रसवधानं॥

सर्व्वं पिंडवच्छ्राद्धं सकृदाच्छिन्नानाम ग्नौ प्रक्षेपः ॥ पश्चाद् दुल्मुकस्य च ॥ भोजनपात्रा
णि चालयित्वा संचराय्युक्षणं ॥ शालङ्गानेकृत्वा अमुकपितॄणां कृतस्य श्राद्धविध्येर्य
न्यूनातिरिक्तं परिपूर्णमस्तु ॥ वाजे वाजेइति पितृपूर्वं विसर्जनं ॥ आमावाजस्येत्यनुव्रज्य
प्रदक्षिणीकृत्य गृहप्रवेशः ॥ इति श्रीत्रिरात्रिचिह्नं मादस्थपति श्रीमहायाज्ञिकवाम
नात्मजदीक्षितगदाधरविरचिते कासानीयश्राद्धसूत्रपद्धतौ पार्वणश्राद्धपद्धतिः
॥ ॥ अथ पूर्त्याग्निकस्य निरग्निकस्य दाहानंतरं सहतादि श्राद्धमिति तत्र ततः पिंडभावकुच्य
ते ॥ तदाह कात्यायनः मौंजीबंधाद्दाहाच्च वर्षादूर्ध्वं वर्षमेव च ॥ पिंडास्त सपिंडनोद
द्युः सपिंडीकरणादिते ॥ अत्र सपिंडीकरणपिंडविधानात तत्पूर्वं पांडश्कोत्तरप्रभृतीनां
श्राद्धानां मध्यात् पिंडदानमनुज्ञातमिति ॥ दाहे कृतेपि महालयेगयाश्राद्धमताहे पुपिं
डदद्युः ॥ तदुक्तं ॥ महालये गयाश्राद्धे मातापित्रोर्मृतेहनि ॥ कृतोद्वाहोपि कुर्वीत पिंड
निर्वपणं सुतः इति ॥ गयाशब्देन तीर्थान्युपलक्ष्यते ॥ मृतेहनीति मातापित्रोस्तत्व

30

तिरिक्तानामपि च मृताहेषु मासिकेषु च ॥ संग्रहे पुत्रविवाहोपनयनाद्‌र्ध्वं वर्षार्द्धं वर्षमेव वा ॥ न
कुर्यात्सिंडनीर्वापं न दद्यात्करणानि च ॥ करणं न्यावाहनादीनि विवाहादी निमित्ते नोक्तका
ळपर्यंतममावास्याष्टकासु संकल्पश्राद्धं कुर्यात् ॥ श्रुतिवचनात्सिंउपितृपरत्वमेव ज्ञेयं ॥
अथ सांवत्सरीके विशेषः ॥ तत्र विभक्तानां सर्वेषां ज्येष्ठपुत्र एव मातृसांवत्सरीके यथो
चितं गृहकार्यः ॥ यत्र च माता स्वामिनी स्यात्तत्र गृहे तं तत्रैव क्रमेण पाकं कृत्वा पितृश्राद्धं पृ
थक्कृत्वैकवर्हिर्विषेष्टपिंडान् दद्यात् ॥ विप्रं पंको सुवासिनीं चाधिकां भोजयेत् श्राद्धभ
स्मरे ॥ एकादिनेऽनेकश्राद्धप्रसक्तौ पूर्वं पितुः पश्चात्पितृव्यादीनां श्राद्धं कार्यं ॥ मृता
हग्रहणं चेद्दामेन हेम्ना वा आब्दिकं कार्यं क्षयाहे आशौचादि प्रतिबंधे तदंते कर्त्तव्यं ॥
मातृपितृक्षयाहे श्राद्धकर्तृः स्त्री कर्तृकं वा श्राद्धं सा रजस्वला चेत्संचमे दिने कुर्यात् ॥
अथ महालये विशेषः ॥ तत्रोद्देशोऽच्यते ॥ पितृव्य भ्रातृ पुत्र पितृ ष्वसृ भार्या पितृव्य
पितृ भ्रातृ पुत्री भगिनी दुहितृ भागिने आचार्य श्वशुर श्वश्रु उपाध्याय गुरु सखी
द्रव्यद इत्युद्देशो ॥ शिष्यादय इति संन्यासाविषये वायुपुराणोक्तविशेष दर्शिता ॥ स

न्यासिनोस्याद्धिकादिपुत्रः कार्यो यथाविधि महालयेतु यच्छ्राद्धं द्वादस्यां पार्वणेन तु ॥ अ
थ भाद्रपदापरपक्षे भरणीश्राद्धविशेषः ॥ तदुक्तं मात्स्ये ॥ भरणी पितृपक्षे तु महती परि
कीर्तिता ॥ तस्यां श्राद्धं कृतं येन स गयाश्राद्धकृद्भवेत् ॥ तत्र सपत्नीकपितृपितामहप्र
पितामहानां ॥ सपत्नीकमातामहादीनां श्यौ द्वयसां कल्पश्राद्धं कुर्यात् ॥ भविष्यपुरा
णे ॥ आग्नौकरणमर्घं चावाहनं चावनेजनं पिंडश्राद्धं प्रकुर्वत पिंडहीने निवर्त्तते ॥ पिंड
ने वा परिहृतं यश्राद्धं विधीयते ॥ स्वधावाचनलोपोस्ति विकिरस्तु न लुप्यते ॥ अक्षय्य
दक्षिणास्वस्ति सोमनस्यं यथास्थितिरिति चतुर्दस्यां पित्रादित्रयमध्ये एकस्य द्वयो
र्वा विषशस्त्रादि उपपाते मृतयोः ॥ पितृव्यादेर्वा तथाविधस्यैकोद्दिष्टविधिना श्राद्धं
कुर्यात् ॥ द्वंद्वस्यैकोद्दिष्टं सदैवं ॥ तथा च संग्रहे ॥ प्रेतपक्षे चतुर्दस्यामेकोद्दिष्टं विधा
नतः ॥ देवपूर्वं तु तच्छ्राद्धं पितॄणामक्षयं भवेत् ॥ इति ॥ अथ तीर्थश्राद्धविशेषः ॥ तत्र
षड्पुरुषोद्देशेन ॥ तत्रादिग्बंधावाहनार्घ्यादि जोगुष्ठानि वेशनतृप्तिप्रश्नविकरान
कर्तव्याः ॥ ब्राह्मणपरीक्षा च न कार्या ॥ न च दग्धदूषितादिविचारः ॥ षसु रूपपिंड

(3)

दानानंतरं किंचिद्धविःशेषेण मातृपितामहीप्रपितामहीभ्यः पिंडदानमात्रं तदनंतरं मात्रादिपिं
डपूर्वतः कुशेषु ज्ञातिवर्गमुद्दिश्यैको दहसिंडो दातव्यः ॥ पिंडानां तीर्थसान्निध्ये प्रक्षेपः ॥ अथ
नित्यश्राद्धे विशेषः ॥ संकल्पः ॥ पुष्पाक्षतादिभिरासनादीही पांतोपचारैः ब्राह्मणपूजनं ॥ मं
डलं कृत्वा भाजनानि निधाय परिवेषणं पात्रालंभादि ब्राह्मणभोजनांतं दत्वा किंचिद्द्या
त् ॥ नात्र कर्तृभोक्तृनियमाः ॥ भोक्तृभोज्यादि अशक्तौ अन्नमुद्धृत्य स्वशक्तितपो दाविभ
ज्य पितृनुद्दिश्य यजेत् ॥ इति नित्यश्राद्धं ॥ सर्वश्राद्धप्रकृतिभूतं पार्वणमुक्त्वा पुनर्विकृ
तिभूतमेकोद्दिष्टमारभ्यते ॥ अथ एकोद्दिष्टं ॥ ॥ अथ पार्वणानंतरं एकोद्दिष्टं व्याख्या
स्यते ॥ अथान्वर्थसंज्ञा चैषा ॥ एकमुद्दिश्य क्रियते तदेकोद्दिष्टमिति ॥ एकोर्घ्य एकं पवित्र
मेकः पिंडः ॥ अस्मिन्नेकोद्दिष्टे एकोर्घः ॥ एकं पवित्रमेकः पिंडश्च स्यात् ॥ अर्घस्यैक
त्वेऽर्घपात्राणि न व्येकमिति ज्ञायते ॥ अत्र प्रथमशब्दस्यानुपपत्तेः ॥ पितृभ्यः स्था
नमसीत्यस्यानुपपत्त्या त्वात्सं श्रवस्य बहुत्वाभावाच्चात्र न्युब्जीकरणाभावः ॥ ना
वाहनं नाग्नौकरणं नात्र विश्वेदेवाः स्वदितमिति तृप्तिप्रश्नः ॥ सुस्वदितमिति तरे अप्युपतिष्ठता

स्थाने विरम्यतामिति विसर्गो विरताः स्म इतीतरे ॥ स्पष्टमेतत् ॥ अत्राग्नौकरणनिषे
धादेव पात्रालंभनिषेधो हुतशेषदानानंतरस्य विहितत्वात् ॥ अमतं जुहोमीति
मंत्रलिंगात् हुतशेषस्यैव परामर्शात् हुतशेषाभावे पात्रालंभाभाव इति निश्चीयते इति
हलायुधभाष्ये ॥ इति गदाधरकृते कातीयसूत्रभाष्ये चतुर्थकंडिका ॥ ॥ अथ प्रयोगा ॥
निमंत्रणं ॥ ततो मध्याह्न स्नानं ॥ ततः कर्मांगस्नानं ॥ द्विजेभ्य उदकदानं ॥ मंडलकरणं ॥
द्विजैराचमनकरणं ॥ पादप्रक्षालनं ॥ ब्राह्मणस्योपवेशनं ॥ दीपस्थापनं ॥ देव
ताभ्यश्च पाठः ॥ नीवीबंधनं ॥ तिलान् रक्षांसि परिपाठादिभिः प्रकिरणं ॥
जलाभिमंत्रणं ॥ पात्रप्रोक्षणं ॥ आसनदानं ॥ हस्तप्रक्षालनं ॥ आवाहनं ॥ अ
वकिरणं ॥ जपः ॥ एकस्यार्घस्य पूरणं ॥ दानं ॥ न पात्रन्युब्जीकरणं ॥ न संस्रवचंदनं ॥
न तेगंधादिदानं ॥ नाग्नौकरणं ॥ पात्रालंभो न भवतीति हलायुधमतं ॥ अन्येषां
मते तु भवत्येव ॥ अंगुष्ठमन्यवगाहनं ॥ तिलावकिरणं ॥ संकल्पः ॥ उदकदानं ॥ जप ॥
अन्नप्रकीरणं ॥ आचमनं ॥ उदकदानं ॥ जपो यथोक्तः ॥ स्वदितमिति प्रश्नः ॥ सुस्वदि
तमिति ॥ ब्राह्मणाः ॥ शेषु ॥ शेषान्नस्यानुज्ञापनादि पिंडपूजनं च पूर्ववत् ॥ एकः पिंडो

देयः॥ ततः स्रुप्रोक्षितादि॥ अभ्युक्षणं॥ अभ्युक्ष्योदक्स्पर्शनं॥ उपतिष्ठतामित्यक्षय्यस्था
ने॥ प्रार्थनादि॥ उदासेचनं॥ दक्षिणादानं॥ विश्वेदेवाः प्रीयंतामिति प्रैषः॥ प्रार्थना
पिनतिलयूं॥ पिंडप्रयवधानं॥ सव्यं अवप्राशनं॥ अग्निमतउल्मुकसकृदाछिन्न
योरग्नौ प्रक्षेपः॥ पात्रोच्चालनं॥ संचरणमुच्छिष्टगतं ततो चपूर्वोच्चारितेस्यादि॥ अ
भिरम्यतामिति विसर्जनं॥ अभिरताः स्मइति प्रत्युक्तिः॥ अनुगमनं गृहप्रवेशः॥
॥ इति नववर्षक्रिया गदाधर भाष्ये एकोद्दिष्टपद्धतिः॥ ॥ अथैकोद्दिष्टप्रसंगा
त्क्रियापद्धतिरुच्यते॥ तत्र सायं हुत्वा हुतायां यजमानस्य मरणशंका चेत्तदैव प्रा
तराहुतिर्होतव्या॥ जीवेत्पुनः काले प्रातराहुतिर्नैव होतव्या पौर्णमासेष्ट्यनंतरं
प्राग्दर्शाद्यदा यजमानमरणशंका स्यात्तदैव पिंडपितृयज्ञवर्जितामावास्येष्टिं
कुर्यात्॥ ततस्तदर्थं तं पशुसोमः॥ आन्हियमाणे हविषि चेन्म्रियेत तदा हविषां दक्षिणा
ग्नौ प्रक्षेपः॥ ग्रहणप्रक्षत्ति प्राग्ध्वविरासादनान्मरणं चेत्ताहृप्सेहविषां दहनं॥ सा
दनोत्तरकालमाहवनीये॥ एवं वैश्वदेवपर्वणकृते यजमानस्य मरणशंकायामवशि

रूपर्वणां समापनं कार्यं ॥ सकलेष्ट्यसंभवे वाज्यं संस्कृत्य पुरोनुवाक्यायाज्याभ्यां तस्य स्वाहा
विषां यागः कार्यः ॥ तदसंभवे चेत्कलेनाज्येन चतुर्गृहीतेन प्रधानदेवतानां यागमा
त्रं कुर्यात् ॥ तस्याप्यसंभवे त्रेतिदैवतं पूर्णाहुतिं जुहुयात् ॥ अग्नये स्वाहा विष्णवे स्वा
हेंद्राय स्वाहेति ॥ असत्रेपतस्तु अग्नये विष्णवे इंद्राग्निभ्यामिति ॥ एवं स्मार्तपक्षादिकमा
र्यं तं सकलं ज्ञेयं ॥ असंभवे चरुहोमे देवतानामाहुतिमात्रं वा पक्षामावास्यायां पर्यंतं य
जमानो जीवति तदमावास्यायां दक्षिणाग्निमत्र पिंडपितृयज्ञः कार्यः नाग्न्यान्वा
धानं ॥ नब्राह्मणपानं ॥ न चामावास्येष्टिः कृतत्वात् ॥ सर्वकर्मसमर्पणांतंभ ॥ नाति ॥ कृत्तुर
भावात् ॥ हविः प्रतिपत्तिविधानाच्च ॥ अग्निहोत्रहोमे प्राहुतेहविषि दक्षिणाग्नेर्गार्ह
पत्यादि प्रागासादनात्प्राक् हपसेषहनं ॥ आसादनात्याहवनीये ॥ एवमेव पशुयागसो
मादावारब्धं तरामरणाज्ञात्वायां पश्वासंभवं समापनं कार्यं मृते पुत्रादिः कृतापस
व्यः सकलस्य हरिसमुहनादि संस्कार कूरणं गार्हपत्याहवनीयं दक्षिणाग्न्योर्विह
रणं ॥ तिस्त्र एव स्थाल्लौ रेष्टे वेइ साध्व पुराह ॥ गार्हपत्याहवनीयदक्षिणाग्निष्वग्नि

रणं॥गोमयपिंडो बलवती नाम॥मृण्मयी नाम सुखा नाम धिक्रमपणं॥अत्र सर्वकर्म अपसव्येन द
क्षिणामुखेन कर्तव्यं॥सव्याप सव्ययो रूर्ध्वाधिक्रमपवानकुर्यात्॥तौ प्रसंधा
वेवस्तुल्यो मध्ये निधापनीयेते॥सर्वास्तु स्थाली पूचिन्हकरणं॥अथ मरणस्थाने
एकोद्दिष्टेन विधिना श्राद्धं॥तत्र संकल्पः॥मरणस्थाने एकोद्दिष्टश्राद्धमहं करि
ष्ये॥उपहारप्रोक्षणं॥आचमनं॥आमान्नसंकल्पः॥पिंडदानं॥आवाहनार्घ्या
र्चनपात्रालंभनावगाहनविद्धि रावाने जनेरेखाप्रत्यवनेजनं॥धूपार्चना
क्षयोदकदानमासीः स्वधावाचनीय निक्षेप्राक्षाव: सव्येन दक्षिणादानं॥दक्षि
णाकाले माषान्नजलसंयुक्तं कुंभदानं॥इति मरणस्थाने एकोद्दिष्टविधिना
श्राद्धं॥ततो मृतस्थाने शवनाम्ना पिंडदानं॥अमुकगोत्रामुकशर्मेति प्रयोगः॥
सजलमाषान्नं कुंभदानं॥ततः पूर्ववदेकोद्दिष्टविधिना द्वितीयं द्वारदेशे श्राद्धं॥
श्राद्धे तत्रैव पंथा नाम्ना श्राद्धपिंडदानं पांथ एतत्ते इति प्रयोगः॥माषान्नजलसंयु
क्तं कुंभदानं॥संतापजानानीदापान त्रिशूरारमारोप्य दक्षिणागमनं॥यमगाथां

नायमानो यमस्य दूतैश्च तं पंतद्व्रति एवं आहुः ॥ अहरहर्नीयमानो गामश्वं पुरुषं व्रजं ॥
वैवस्वतो न तृप्यति सुराया इव दुर्मतिः ॥ इति यमगाथा ॥ अपेतो यंतु पणयः सुपयमप्या
योयमस्य दूतैः ॥ ततश्चत्वारो प्रेतनाम्ना पिंडदानं ॥ माषान्नजलसंयुक्तं घटदानं ॥ श्म
शानयोरर्धमार्गे नीते तत्र पूर्ववदेकोद्दिष्टविधिना श्राद्धं ॥ अमुकप्रेतस्य दा
हार्थं श्मशानं नीयमानस्यार्धमार्गे विश्रामस्थाने श्राद्धं अहं करिष्ये इति प्रयोगः ॥
श्राद्धांते अमुकनाम्ना पिंडदानं ॥ अमुक प्रेत एतत्ते पिंडं ॥ माषान्नजलसंयुक्तं
घटदानं ॥ तमेव बहुलतृणोदेशे क्षारिण्याद्यागध्र सवितानसाधनं ॥ गार्हपत्या
हवनीयदक्षिणाग्निषु सर्वेषु संस्कारकरणं ॥ तत्र गार्हपत्यादीनां स्थापनं ॥
सभ्यावसथ्ययोश्चितेरुत्तरतः सप्तसु प्रक्रमेषु स्थापनं ॥ ततो गार्हपत्याहव
नीययोर्मध्ये काष्ठैश्चितिं संचिनुयात् ॥ ततः प्रेतस्य केशश्मश्रुनखकोमलानां छे
दनं ॥ केशादीनां निखननं ॥ प्राग्ग्रीवमुत्तरलोमं कृष्णाजिनं चितायामास्तीर्य त

तस्मिन्न्ययजमाने प्राक्शिरसमादधाति ॥ ततः प्रेतस्य कुरे प्रेतनाम्नाद्भिर्दानं ॥ अमु
कप्रेत एतत्त इति माषान्तिलैर्लेपुन्नस्य दानं ॥ ततः प्रेतस्याज्येनाभ्यंजनं ॥ मुखे दक्षिणो
त्तरनासिकाचक्षुः श्रोत्रेषु हिरण्यशकलप्रास्तानं ॥ अथ चितिचयनात्प्राक्
हिरण्यशकलोपासनमाम्नातं ॥ सूत्रे तु शाखान्तरादयं क्रमो वसितः ॥ चितिच
यनात्पूर्वं वा कर्तव्यं ॥ प्रेतस्य वस्त्रैकदेशे संचयनार्थं गृहीत्वा सुगुप्तं निदधाति ॥
सर्वाणि पात्राणि प्रागग्राण्युत्तानानि वक्ष्यमाणविधिना निदधाति ॥ जुहूं घृ
तेन पूरयित्वा दक्षिणहस्ते सादयति ॥ सव्ये पाणौ रिक्तामुपभृतं ॥ हृदये ध्रुवां ॥ र्णयोः
मुखे ॥ दक्षिणनासिकायां वैकङ्कतं स्रुवं ॥ प्राशित्रहरणं शिरसि ॥ प्रणीता
प्रणयनं चमसं कपालानि वा शिरसि ॥ अप्सु वा प्रक्षेपः ॥ कपालानां पार्श्वयोः प्र
पौ ॥ दक्षिणपार्श्वे दृषदं ॥ उत्तरपार्श्वे प्रातिप्रस्थानमुपलं ॥ अवत्तवरुणप्रघासस्ये
ष्टिकमेव दिधावत्या पार्श्वयोरेकैकं खण्डमासादयेत् ॥ उदरे प्रषदाज्यवतीं इडापा

त्रीशिक्ष्य समीपे रम्यां॥ अंऽयोः समीपे अरणीति। तत्समीपे अध्योमुखं मसलुस्व
लमुसलं च॥ उपवेषा। पात्री भूतानदान पुरोडाशपात्री प्रोक्षणीपात्र स्वऽवं तत्कूर्चे प्र
मुखानि सर्वाणि पात्राणि कुर्वीत मध्ये सादयेत्॥ स्माार्त्त पात्राण्यप्य अरणी सेहिता
निवारणप्रयासि द्यानि च तत्रैवासादयेत्॥ मन्मयाश्मनमयानाम प्सु प्रक्षेपः॥
लोहमयानां च ब्राह्मणाय दानमप्सु प्रक्षेपो वा॥ त्रेताग्नि भिश्चिते रादीपनं॥ तत्रै
वं॥ अग्निनाराभ्य चितिपर्यंतं तृणैराछादनं कृत्वा नतस्तान्प्रदीपयेत्॥ आह
वनीयगार्हपत्यदक्षिणाग्न्युसन्न ज्वालया चितेरादीपनं यथा भवति तथाभि
धेयं॥ पुत्रो वा। भ्राता वाऽन्यो वा ब्राह्मण आहुतीर्जुहूयात्॥ तान पुत्रो गार्ह
पत्ये आज्यसंस्कारः॥ अग्निहोत्रहव्यां स दरगट होत यहणं॥ आहवनीये स
मिसक्षेपः॥ अस्मात्वमधि जातो सित्वदयं जायतां पुनः॥ असौ स्वर्गाय लोकाय

व

85

स्वाहेस नेन मंत्रेण होमः॥इति मग्नयेन ममेतित्यागः॥असौस्थाने प्रेतस्य प्रथ
मांतं नामग्रहणं॥अस्य मंत्रस्य स्त्रियामनूहः॥ततोग्निहोत्रहवणीं मुखे प्राग
ग्रामासादयेत्॥खादिरं स्रुवं सव्यनासिकायां स्यस्य दक्षिण हस्ते आज्य
स्थाल्यावर्जेतरे प्रक्षेपः॥पात्रसाविशेषात्॥मृन्मयी चेदप्सु प्राशनं॥अथप्र
संगादावसथ्य सबंधि पात्र प्रतिपत्तिरुच्यते॥आहिताग्निर्यथान्यायं दाघ
व्यस्त्रिभिरग्निभिः॥अनाहिताग्निरेकेन लौकिकेनेतरजनाः॥अथसु
त्रादिराप्नुसकुर्याद्वारुचयं वहु॥अप्रदेशे शुचौ सूक्ते पश्चाच्छ्रियादिलक्ष
णं॥तत्रोत्तानं निपात्यैनं दक्षिणाशिरसं सुखे॥न्यस्य हिरण्यं शिरसि
प्रणीताचमसेतथा॥रूपैतत्सार्श्वयोरेकं चोद्धृप्यात् तत्पूर्ववन्यसेत्॥
श्रवणाकर्मसंबंधि द्वितीयपिंडयज्ञियं॥आं उपोररणीतद्वैतत्प्रोक्षणीपात्र

मादितः ॥ पात्राणि च्चालरेणोरून्मत्मयाद्यं भस्मनि क्षिपेत् ॥ अथाघृतसंजातस्तो
रघाद्दक्षिणतः शालैः ॥ पूर्ववदुक्त्वा दन्होसमि दर्भैस्त्रुवे लसः ॥ दक्षिणायं स्त्रुवं देघा
॥ नास्ति स्कंदक्षिणो करे ॥ पात्रप्रदेशे ॥ समिधियालनो वह्निश्चो षंस्यादाहिताग्निवत् ॥ उपासि
श्रयणा श्रिपूर्वैरंतरे पात्रप्रक्षेपो तं समाहिताग्नेवल्केवल्कोपासनीनश्चितो मृतं दक्षिणा
शिरसि संनिदध्यात्प्राक्शिरसामिति विशेषः ॥ इत्यावसथ्यसंबंधि पानीणां प्रति
पत्तिः ॥ अथ सूतिकामरणे विशेषः ॥ सूतिकायां मृतायां कुंभे उदकं कृत्वा तत्र पंचगव्यं प्र
क्षिप्य आपो हि ष्ठादि मा यहत्यादि पुण्याभिरभिमंत्र्य शतावरेणानुस्नयापंचदशप्रजापत्या
न्कृत्वा तेन चरुं भोदकेन शतकृत्वः स्तां स्नापयित्वा वस्त्रांतरेण हेसयं वेष्टयित्वा दहेः ॥ मर्य
रजस्वलामरणेप्येवं ॥ उदकीस्तनकीवास्पृशातीतस्पर्शनीतर्प्यप्येष एव विधिः ॥ किंचि
सविशेषणीयं ॥ न विशेषस्तु दग्धव्य इव वचनात् ॥ अथ स्मार्तमृतकर्मोच्यते ॥ नद्या
मुदकसमीपगमनं ॥ समीपस्थितं योनिसंबंधि शालकेवोदकं करिष्याम हे इति मं

त्रेणोदकं याचयेत् सपिंडादयः यदि त्रिवर्षादर्वाक् प्रेतो भवेत् तदा कुरुध्वमिति वचना
मिस्तुकैः सप्तपुरुषसंबंधिनः सपिंडाः दशपुरुषसंबंधिनः समानोदकाश्चैके यामनि
वासे यावत्स्मृतं अध्वं प्रविश्य त्येकवस्त्राः असिखाः प्राचीनावीतिनः संतः ॥ ततः स
व्यपाणेरनामिकायांगुल्या जलमपनः शोशुचदघमित्यनेन नामंत्रेण पनोघ
दक्षिणामुखास्तत्र सकृन्निमज्जंति ॥ कर्णादिभाष्यकाराणां मते पनोदने मंत्रः ॥ देवयाज्ञि
कादिमते निमज्जने ॥ ततः प्रेतमुद्दिश्यैकैकमंजलीं सकृन्मो प्रक्षिपंति ॥ अमुकसगो
त्रामुकशर्मन् प्रेत एतत्ते उदकं दद्यामिनेन मंत्रेण ॥ तत उदकादुत्तीर्य शुचौ देशे शाद्वलवत्यु
पविश्य ॥ तत्रैव दिनत्ये सुहृद इतिहासपुराणादिकथाभिः संसारस्यानित्यतां दर्शयं
तो वदेयुः ॥ गाथा ह्यपि हरन्तत्क्षणमात्र पत्यस्मिन्निमेष गण्ड्रलवान् तस्मिन् राघव वती भूमा
उपविश्य प्राज्ञ्यथः ॥ रोदनं न कर्तव्यं ॥ तदुक्तं ॥ श्लेष्माश्रु बांधवैर्मुक्तं प्रेतो भुंक्ते यतो
वशः ॥ अतो न रोदितव्यं हि क्रियाः कार्याः स्वशक्तितः इति ॥ ततः पश्चादनवलोकयंतः

पंक्तिव्यवस्थानेन कुर्वंति स्थानयतः कृत्वा ग्राममार्गं छंति॥ गृहद्वारसमीपमागत्य सर्वे
त्रिपित्रीणि निंबपत्राणि दंतैः खंडयित्वा आचम्योदकमग्निं गौरसर्षपांस्तैलमिति नागि
प्रत्येकं स्पृष्ट्वा पादेन पाषाणमाक्रम्य गृहं प्रविशंति॥ ततः प्रभृति त्र्यहं स्वचारणोष्मः शायिनो
न किंचन कर्म कुर्वंति॥ न कारयंति॥ क्रीत्वा लब्ध्वा वा दिवा भुंजीयुः अमांसं पिंडं दत्वा ततो भो
जनं॥ भोजनकाले भोज्यादन्नादुद्धृत्य मुष्टिं च प्रेतोद्देशेन तूष्णीं निक्षिपेत्॥ अमुकसगो
त्रामुकप्रेत भक्तमुष्टिरुपतिष्ठतामिति॥ पुत्रादिर्दशरात्रं यावत्प्रत्यहमेकैकमेव यवपूर
कं पिंडं प्रेताय दद्यात्॥ तत्र विधिः॥ स्नानं कृत्वा ऽहते वाससी परिधाय पिंडं वितरेत् तद्व
त्॥ ...पिंडदानं॥ तूष्णीं प्राणायामः॥ आचमनं॥ देशकालौ स्मृत्वा ऽमुकगोत्रस्यामुकप्रेत
स्य प्रेतत्वनिवृत्त्यर्थं क्षुत्तृष्णानिवृत्त्यर्थं शिरो निष्पत्त्यर्थं पिंडदानं करिष्ये। भोजनदानमुदक
दानं चाहं करिष्य इति प्रयोगः॥ अवनेजनं॥ अमुकगोत्रामुकप्रेतावनेनिक्ष्वेति दर्भास्त
रणं॥ पिंडदानं॥ अमुकगोत्रामुकप्रेतैष ते शिरःपूरकपिंडो मया दत्तः इति॥ पूर्ववत्पुनर

वनेजनं॥ अनुलेपनं पुष्पधूपदीपशीतलतोयकुंभकुर्णातंतुदानं पिंडेष्वस्मयंतरोत्त
मपि कुर्यात्॥ ततः पिंडसमीपे॥ इदं भूमौ एवं जलितोयदानं॥ अमुकगोत्रामुकप्रेत
त्वमेतत्तोयांजलिरूपनिष्ठतां॥ इदं तोयपात्रं ते० अमुकसगोत्रामुकप्रेतस्याने
न प्रेतत्वनिवृत्तिरस्तु॥ क्षतषानिवृत्तिः शिरोनिष्पत्तिरस्तु॥ पिंडमुदके निक्षिपे
त्॥ स्नात्वा नवश्राद्धं कुर्यात्॥ ततस्तु षष्ठीपूर्ववत्कर्म॥ युग्मा विमाः॥ तूष्णीं निमंत्र
णादि॥ पादप्रक्षालनं॥ आचमनं॥ उपवेशनं॥ तूष्णीं प्राणायामः॥ द्विराचमनं देशकाला
द्योस्मत्तामुकप्रेतस्य प्रेतत्वनिवृत्त्यर्थं एकोद्दिष्टविधिना प्रथमदिवसनिमित्तं नवश्राद्धम
हं करिष्ये॥ उपहारप्रोक्षणं॥ तिलदर्भविकीरणं॥ आच० आमान्नसंकल्पः॥ इदमामान्नेन
मुपतिष्ठतु॥ तिलविकिरणं॥ दक्षिणाग्रदर्भास्तरणं॥ अमुकगोत्रामुकप्रेते एते पिंडं इति
पिंडद्वयं दद्यात्॥ अवनेजनप्रत्यवनेजने न स्तः॥ प्रत्येकं गोत्रोच्चारणादि॥ स्वधादानं॥ पिं
डोद्धारणं॥ एतस्य नवश्राद्धविधेर्यन्न्यूनं तदतिरिक्तं तत्सर्वमित्यादि॥ पिंडयोरुदकेप्रक्षेपः॥

एते एव पदार्था अत्र भवंति नान्ये ॥ इर्दंन वश्राद्धं याप्याश्यान वश्राद्धं सिंडदानं ॥ गर्ते तैल
कल्चोष्णोदकानां प्रेतो देशेन प्रक्षेपः ॥ अमुकगोत्रामुकप्रेतात्र जलेन स्नाहीत्यादि ॥ अथ
यस्मिन्नहोरात्रे सम्रतो भवति ॥ तस्मिन्रात्रौ एकत्र मृन्मये पात्रे उदकं द्वितीये क्षीरं च ल
त्वा षष्ठ्यादिकम वलंब्याकाशे धारयेत् ॥ अमुकप्रेतात्र स्नाही पिबेदमिति मंत्रेण ॥ ॥
इति प्रथमादिन कृत्यं ॥ अथ द्वितीयदिने प्रेतस्य कर्णाक्षिनासिकानिष्पत्त्यर्थं पिंडदानं ॥ कुं
न भोजनदानं ॥ द्वौ अंजली द्वितीयपात्रे ॥ त्रयउदकांजलयः एवबादेपानपात्रे ॥ इति द्वि
यदिनकृत्यं ॥ तृतीयदिने गल्लांसभुजवक्षांसि निष्पत्त्यर्थं पिंडदानं ॥ त्रयों जलयः ॥
त्रीणि तोयपात्राणि ॥ अथ पंचोदकांजलयः एव ॥ प्रथमदिवसवन्नवश्राद्धं ॥ इति तृ
तीयदिनकृत्यं ॥ अथ चतुर्थेहनि संचयननिमित्तमेकोदिष्टश्राद्धं ॥ न च प्रथमदिन
वत् ॥ अत्रैकएकपिंडः ॥ श्मशानवासदेवतानां बलिहरणं ॥ पुष्पधूपदीपनैवेद्यानि
संन्यस्य ॥ ॐ क्रव्यादमुखेभ्यो देवेभ्यो नमः इति मंत्रेणार्घ्यादिना पूजां कुर्यात् ॥ ततः क्रव्या

८०

दमुखेभ्यो देवेभ्यो बलिदानं॥ तत्र मंत्रः॥ देवा यस्मिन् स्मशाने स्मु भगवंतः सनातनाः॥ ते
स्मत्स काशात् गृह्णंतु बलिमष्टांग मक्षयं॥ प्रेतस्यास्य शुभाल्लोका प्रयच्छंत्वपि शाश्वतान्॥ अ
स्माकमायुरारोग्यं सुखंच ददन्तु अक्षयमिति॥ एवं बलिं दत्वा विसर्जयेत्॥ पञ्चशाखं तेन
स्थानं निरंगलानि कृत्वा॥ अंगुष्ठकनिष्ठिकाभ्यां मादाय पञ्चशाखपुटके प्रासनास्त त्रश
म्यशाखा लकर्दमानां च प्रासनं॥ तथोद्धनेनास्मात् सर्वसुरभीश्चदनागरुकर्पूरकेशर
कस्तूरिकाभिमिश्रणं॥ दक्षिणाग्र बीयतांकर्पूरखात्वा॥ तत्र कुशास्तरणं॥ हरिद्रालो
पितवस्त्रखंड मास्तरणं स्मिन् चरु स्त्रेवा नि वपामीत्यनेन मंत्रेणास्थि प्रक्षेपः॥ ॐ
आत्मा मनसा नान्येन ब्रह्मणात्रय्या विधया पृथिव्या मास्तिकायामपां रसेन निबयाम्य सा
वितिमंत्रेण वा॥ अस्मोस्थाने प्रेतनामादेशः॥ पितृमेधं चिकीर्षतः कुंभे अस्थिसंच
यनं कर्तव्यं॥ अस्मिन्पक्षे कुशास्तरणं॥ हरिद्राक्तापि तवस्त्रास्तरणं॥ कुंभे एव कर्त
व्यं॥ अस्थिसंस्कारत्वात् कचिन्मृत प्रदेशे कुंभनिधानं॥ तूष्णीं कुंभ मध्ये स्थित्रक्षे

पे मंत्रो भवत्येव॥ इत्यस्थिसंचयनं॥ चिताभूमिं गोमयेनोपलिप्य तत्र तेनैव श्वेतांक बलि
मंत्रेण बलिं दद्यात्॥ ततः चतुर्थदिवससंबंधि पिंडदानं॥ नाभिलिंगगुदनिष्पत्त्यर्थं॥ कुंभ
भोजनदानं॥ जलांजलयश्चत्वारः॥ चत्वारि जलपात्राणि च॥ अथवा सप्तांजलयएव॥
इति चतुर्थदिनकृत्यं॥ पंचमेहनि जानुजंघापादनिष्पत्त्यर्थं पिंडदानं॥ कुंभभोजन इ(रि)
तः॥ पंचजलांजलयः॥ पंच पात्राणि॥ नवांजलयएव वा॥ ततो नववस्त्राद्यं प्रथमदिने
वत्॥ इति पंचमदिनकृत्यं॥ षष्ठे सर्वमर्मनिष्पत्त्यर्थं पिंडदानं॥ कुंभदानं॥ षट्जलांज
लयः॥ षट्तोयपात्राणि॥ अथ एकादशांजलयएव वा॥ इति षष्ठदिनकृत्यं॥ सप्तमे
नाडीनिष्पत्त्यर्थं पिंडदानं॥ कुंभभोजनदानं॥ सप्तांजलयः॥ सप्तपात्राणि॥ त्रयोद
शांजलयएव वा॥ प्रथमदिनवत् नववस्त्राद्यं॥ इति सप्तमदिनकृत्यं॥ अष्टमेह्नो मदंतनि
ष्पत्त्यर्थं पिंडदानं॥ कुंभभोजनदानं॥ अष्टांजलयः॥ अष्टौ पात्राणि॥ पंचदशांजलयए
व वा॥ इत्यष्टमदिनकृत्यं॥ नवमे वीर्यनिष्पत्त्यर्थं पिंडदानं॥ कुंभभोजनदानं॥ नवांजलयो॥

(३९)

नवपात्राणि ॥ ततो नवश्राद्धं प्रथमदिनवत् ॥ इति नवमदिनकृत्यं ॥ दशमे शरीरपूर्ण
तार्थं पिंडदानं ॥ कुंभक्षोजनदानं ॥ दशांजलयो दशपात्राणि ॥ एकोनविंशतिजलांजले
एव वा ॥ अथवा दशाहमध्ये प्रसहं दशदशांजलय एव देयाः ॥ नपात्राणि ॥ अत्र पिंडत्रय
दानं एवं प्रेतसखिभ्यः द्वितीयं प्रेताय तृतीयं यमाय ० तत्र दशाहो लोकस्थाप्रेतस्य प्रेत
त्वनिवृत्त्यर्थं पिंडदानं करिष्ये ॥ प्रेतसखिभ्यः ॥ अवनेनिक्ष्वा यम अवनेनिक्ष्वा दर्भा
स्तरणं ॥ अवनेजनक्रमेणा पिंडदानं ॥ प्रत्यवनेजनं च पिंडानामुदके प्रक्षेपः ॥ ततः
सूतकनिवृत्यर्थं सर्वे क्षौरमश्रुवपनं कारयेयुः ॥ नखलोमनिकृंतनं च ॥ ततः सर्वे
बांसचैलस्नानं ॥ इति दशाहकर्म संक्षिप्तसमाप्तं ॥ दशाहमध्ये दर्शपाते दर्शदिने ए
व सर्वं दशाहिकं कर्म समापनीयं ॥ त्रिरात्रादर्वागिति केचित् ॥ पित्रोस्तु यावद्दशौ
चं दशाहे दश दिनपर्यंतमेवेति मदनपारिजातकारः ॥ अन्येषां तु मातृपितृव्यति
रिक्तानां प्रथमत्रैयौको दिनप्रभृति दर्शपाते सर्वं समापनीयमेव ॥ एतच्च प्रेतनि
र्हारादिकं व्यतिरिक्तानां प्रथमत्रयाणां कुर्यात् ॥ तथा च स्मृतिः ॥ त्रयाणामाश्रमा

रमाणां च कुर्याद्दाहादिकाः क्रियाः ॥ पतो किंचिन्न कर्त्तव्यं न चान्येषां करोति स इति ॥ तथा ॥
एकोद्दिष्टं जलं पिंडं माशौचं प्रेतसत्क्रियां ॥ न कुर्यात्सार्वणादन्य ब्रह्मीभूतायभिक्षवे ॥
अहन्येकादशे प्राप्ते पार्चनं तु विधीयत इति ॥ ब्रह्मचारिणा चार्योपाध्यायो मातापितृ
व्यतिरिक्तानां निर्हरणादिकं न कुर्यात् ॥ यथाह याज्ञवल्क्यः ॥ आदिष्टिनो दकं कुर्या
दाव्रतस्य समापनात् ॥ समाप्ते तूदकं दत्वा त्रिरात्रमशुचिर्भवेदिति ॥ आचार्यपितृपा
ध्यायान्निर्हृत्यापि व्रती व्रती सकटान्नं चनाश्नीयान्न च तैः सह संवसेदिति ॥ यदिमो
हेति कृतेत दा ब्रह्मचर्यव्रतान्न्यवते ॥ पुनरुपनयनेन तच्छुध्यतीति ॥ सपिंडीकरणं तानि
श्राद्धानि लौकिकाग्निना कार्याणीत्युक्तं ॥ सपिंडीकरणांतानि प्रेतश्राद्धानि यानि वै ॥
तानि स्याल्लौकिके वह्नावित्याह चाश्वलायनः ॥ अथैकादशाहविधिः ॥ तत्र साग्नेर्दा
हादिरन्येकादशाहे ॥ निरग्निकस्य मरणादिना दारभ्यैकादशाहे विधिवत्स्नात्वा षोड
शभि रुपचारैः पूजनपूर्वकं विष्णुं तर्पयेत् ॥ तत्र समंत्रकप्राणायामत्रयं विधाय देशा

४२

काले संकीर्तयामुक गोत्रामुकप्रेतत्वनिवृत्त्यर्थं श्रीविष्णोः षोडशाक्षिरूपनारे ः पूजनपूर्वकं तर्पणमहं करिष्ये ॥ तत्र सर्वौषध्यो तुलसी दुग्धमिश्रमंजलिं कृत्वा दक्षिणाभिमुखो यज्ञोपवीती कृत्वा कैः देवतीर्थेन हस्ते नैव तर्पणं कुर्यात् ॥ नारायणेन ॥ सहस्रशीर्षा पुरुषः ॥ अनादिनिधनो देवः शंखचक्रगदाधरः ॥ अक्षय्यः पुंडरीकाक्षः प्रेतमोक्षकरो भव ॥ पापहा विष्णुस्तृप्यतु ॥ गोविंदस्तृप्यतु ॥ नारायणस्तृप्यतु ॥ पुरुष एवेदमिसारभ्य साध्याः संति देवाः ॥ स्वलमस्यैवेतर्पणं कुर्वंते मनः ॥ इदं विष्णुः ॥ इरावती देवश्रुतो देवेषु विष्णोर्नुकं ॥ दिवो वा ॥ प्रतत् ॥ विष्णोरराटं ॥ इसष्टो ॥ आदित्ये ॥ दिवि विष्णुः अग्नेस्त्वं ॥ रक्षोहणं ॥ रक्षोहणो वो अस्मन्यां ॥ विष्णोः कर्माणि ॥ तद्विष्णोः ॥ वाचस्पतये ॥ उपयामगृहीतोस्यादिसे ॥ विष्णोः क्रमोसि ॥ तद्विप्रासः ॥ त्रीणिपदा ॥ अनेन विष्णुतर्पणेन प्रेतस्य प्रेतत्वनिवृत्तिरस्तु ॥ इति पुराणोक्तं ॥ विष्णुतर्पणं ॥ अथ वृषोत्सर्गसर्गः ॥ तत्र देशकालौ संकीर्त्यामुकप्रेतस्य निवृत्त्यर्थं एकादशाहे श्राद्धादिकर्मयोग्यतापार्थे वृषोत्सर्गं करिष्ये इति संकल्पः ॥ ततो वस्त्रचंदनतांबूलादिना होतृब्राह्मणो वृणुयात् ॥ पूर्वमते तु ब्राह्मवरण

मात्रं॥ होमस्य स्वकर्तृकत्वात्॥ अस्माकं तु पुराणे दृष्टत्वादुभयोर्वर्णमात्र ततः स्वयं
च भूसंस्कारान् कृत्वा वसथ्याग्निस्थापनं॥ रुद्रकलशस्थापनं॥ ततो अष्टानां कलशा
नां स्थापनं॥ प्रतिष्ठा॥ इमे कलशाः सुप्रतिष्ठिता भवंतु॥ होतृब्रह्म प्रणीतानां मासनं
नं॥ ब्रह्मोपवेशनं॥ प्रणीतापात्रमध्ये पिष्टादिनाव्यवधानं कृत्वा कलशेषु दत्तरम्भजं
प्रक्षिप्य प्रणयनं॥ अग्नेरुत्तरतो निधानं॥ परिस्तरणं॥ अग्नेरुत्तरतः पश्चाद्वा पात्रासा
दनं॥ तद्यथा॥ पवित्रच्छेदनानि॥ पवित्रे द्वे॥ प्रोक्षणीपात्रं॥ आज्यस्थाली॥ संमार्ग
कुशाः॥ उपयमनकुशाः॥ समिधः स्तिस्रः॥ स्रुवः॥ आज्यं॥ तंदुलाः॥ पोष्ठच रुः पिष्ट
मयः॥ तस्य चश्रपणानुपदे शाल्लिङ्गएवोपादीयते॥ हेतु वस्त्रयुगं॥ सुवर्णकांस्या
दिदक्षिणा न॥ ब्रह्मणः पूर्णपात्रदानं॥ वरो वा दक्षिणा॥ इति पात्रासादनं॥ चतुरच्छि
द्रीमेक्षणयोरुपकल्प्यतो पवित्रकरणं प्रोक्षणीसंस्कारः॥ यथासादितानां प्रोक्ष
णं॥ असंचरे प्रोक्षणीनां निधानं॥ आज्यनिर्वापः॥ चरुस्थाल्यां प्रणीताप आसे

८२

च्यतंदुलप्रक्षेपः॥ ब्राह्मणा आज्याधिश्रयणं॥ स्वयमेव चरोरधिश्रयणं॥ उभयोः प
र्यग्निकरणं॥ स्रुवप्रतपनं॥ उपयमनकुशादानं॥ समिधोऽभ्याधानं॥ प्रोक्षण्युदकेन प
र्युक्षणं॥ पवित्रप्रतिपत्तिरासनं॥ नान्वारब्धः॥ स्रुवेणाहोमः॥ आज्यस्य॥ ततः इहरति
रिति पञ्चाहुतीर्जुहुयात्॥ ॐ इहरतिः स्वाहा॥ इहरमध्वं स्वाहा॥ इहधृतिः स्वाहा॥ इह
स्वधृतिः स्वाहा॥ एतेषां इदंप्रजाभ्य इति त्यागः॥ इहरतिः पशुदेवस इति सर्वानुक्रमण्या
मुक्तत्वात्॥ ॐ उपसृजं धरुणं मात्रेणं धयन्स्वाहा॥ इदमग्नये॥ रायस्पोषमस्मासु दी
धरत्स्वाहा॥ इदमग्नये॥ ततः आघारावाज्यभागौ॥ ॐ प्रजापतये स्वाहा॥ इंद्राय स्वा
हा॥ अग्नये स्वाहा॥ सोमाय०॥ ततः पायसचरोर्होमः॥ अग्नये स्वाहा० इंद्राय०
शर्वाय० पशुपतये० उग्राय० ॐ अशनये० भवाय० ईशानाय० ततः पिष्टचरु
होमः॥ पूषा गा अन्वेतु नः पूषा रक्षत्वर्वतः॥ पूषा वाजं सनोतु नः स्वाहेत्येकाहु
तिः॥ इदं पूष्णे० ततः॥ पायसपिष्टचरुभ्यां अग्नये स्विष्टकृते स्वाहा॥ ततो भूः स्वा
हा॥ भुवः स्वाहा॥ स्वः स्वाहा॥ त्वन्नो अग्ने स त्वन्नो अग्ने अयाश्चाग्ने ये ते शतं॥

उदुत्तमं०॥ प्रजापतये संस्रवप्राशनं॥ मार्जनं पवित्रप्रतिपत्तिः॥ प्रणीताविमो
कः॥ ब्रह्मणे दक्षिणादानं॥ ततोऽश्वस्य पंचपुच्छकण्ठ से रुद्रमावाह्य गंधमाल्या
दिभिः संपूज्य हस्तेन कलशं स्पृशन्॥ रुद्राध्यायं जपेत्॥ ततः पुरुषसूक्तं॥ रुद्रमो
डे वद देवा देव हेळनमितिर्ऋषि त्र्यृचं॥ षडंग रुद्र जपो वा गरुड पुराणोक्त वचनो॥
ततो वत्स वत्सतरीणां स्नानं॥ अलंकरणं॥ चक्रत्रिशूलांकरणं॥ अंकनां वृष
स्य कर्णजपः॥ वृषो हि भगवान् धर्मश्चतुष्पाद प्रकीर्तितः॥ वृणोमि तमहं भक्त्या
स मां रक्षतु सर्वतः॥ ततो गृहीत पुष्पांजलिर्यजमानः प्रदक्षिणीकृत्य नमस्कुर्युः॥
ततो वृषवत्सतरीणां वस्त्रं संश्लेषः॥ अयं हि वो मया दत्तः सर्वासां पतिरुत्तमा॥
तुभ्यं चैताः मया दत्ताः कल्याः सर्वा मनोरमाः॥ ततश्चतुः कुंभाग्निप्रदक्षिणीकृत्य
वत्सतरीणां अग्निप्रदक्षिणां चत्वारः कारयित्वा पुच्छे पुरुषसूक्तेन प्रेतनाम्नाच

तर्पणं कार्यं ॥ तत उत्सर्गः ॥ अद्येत्यादि देशकालौ स्मृत्वा एतं वृषं रुद्रदैवतं यथाशा
स्त्रोक्तलक्षणलक्षितं गंधाद्यर्चितं एवंविध्या वत्सतरीसहितं अमुकगोत्रामुकप्रेतस्य
प्रेतत्वमुक्तये अहमुत्सृजामि ॥ एतं युवानं पतिं वो ददामि तेन क्रीडंतीश्चरथ प्रियेण
॥ मा नः स्माप्रजनुषा सुभगा रायस्पोषेण समिषा मदेमेति सव्येन पाणिना वृ
षपुच्छं गृहीत्वा दक्षिणेन सतिलाः सकुशा आपः आदाय अमुकगोत्राय अमुकप्रेता
य एष वमया दत्तस्तं तारयितुं सर्वदा इहैवायं सहिरण्यसतिलकुशोदकं प्रमोनि
क्षिपेत् ॥ ततो वत्सतरीमध्ये स्थितस्य वृषस्य मयोभूः इमा वाहि स्वाहेत्या
दि स्वर्णस्य स्वाहेत्यंतेनानुवाकशेषेणाभिमंत्रणं ॥ ततो दक्षिणास्थेयेन वृष
प्रेरणं ॥ पश्चात् पूर्ण्यं पर्यटेति ॥ ततः शक्त्यनुसारेण पायसेन ब्राह्मणानां भोज
नं सहिरण्यस्य रुद्रकुंभस्य सव्यनोदश्यहोत्रप्रदानं ॥ ॥ इति वृषोत्सर्गः ॥ ॥ तत
स्त्रैपाचवारिश्राद्धानि ॥ आद्यं नवश्राद्धं प्रथमदिनवत् ॥ तदुक्तं गरुडपुराणे स्म

तो वा॥ प्रथमेन्हि तृतीये वा पंचमे सप्तमेपि वा॥ नवमेकादशे चैव नवश्राद्धानि कार

येदिति॥ पूर्वद्दिवसादारभ्य नकृतं चेदेकादशेन्हि कुर्यात्॥ नवश्राद्धनामत्र्य मासि

कानामाद्यं स्वतंत्रोऽकोद्दिष्टमेवेति तत्र स्वतंत्रैकोद्दिष्टे क्रियमाणे दशकं वैक्ला

तंत्रे नानुष्ठानस्य सिद्धिः॥ पृथगनुष्ठानपक्षे त्वादौ स्वतंत्रैकोद्दिष्टं ततो नवश्राद्ध

ततो मासिकमिति स्मृत्यर्थसारे॥ तत्रैकादशाहे आद्यमासिकश्राद्धे एकादशाश्रा

लग्नानोमंत्र्यणं॥ पूर्वेद्युः स्नात्वा विप्रेषु प्रेतान योजनं पूजयिष्यामि भोगेन एवं

विशेन्निवेदयेत्॥ अस्तमिते विप्रान्विवेसनं॥ पाद्यं दत्वा नमस्कृत्य तैले न पादौ

प्रक्षालयेत्तानुद्दिने विप्रस्य श्मश्रुनखच्छेदनं कारयित्वा स्नानाभ्यंजनं दद्या

त्॥ ततोऽग्निभागमयहरणं॥ ततो सिद्दयत्नोकर्वं कृतान्नादि हन्नात्यथः॥ मनसा

वा पुत्रतेन विप्रेत्वानियोजयेत्॥ महस्तंडुलस्यकरणं॥ न चादौ सचैल स्नानं।

लोर्थानिमनस्ताध्यात्वा आसनो मधुपर्कपं॥ एवं शुद्धिं कृत्वा ब्राह्मणानामावा
हनं॥ आगतदृष्ट्वा स्वागतवूरणं॥ अर्घ्यपाद्यवूरणं॥ आसनोपवूल्पनं॥
आसनेउपवेशनं॥ छत्रोपानहदानं तिलोपचारवूरणं॥ नाममोत्रमु
दाहृत्य प्रेतायतदनंतरं॥ श्रीब्रमावाहयेतपूमिदं मे हस्तोध्य मूलले॥ तत्रमं
त्रः॥ इहलोकं परित्यज्य गतोसि परमां गतिं॥ एवमाकानि गंधपुष्पधूपैः सम
र्चयेत॥ तत्रोव स्त्रोश्वरपादानं॥ पक्वान्नदानं॥ अष्टादशोपहार्थ्य वर्जितं॥ स
कलं त्रोहृं॥ वासोहिरण्यदास्युपानं छत्रोदकुंभानां गुणवते ब्राह्मणाय दा
नं॥ अश्वरथगजमहिषीशय्यादानं॥ गोभूमितिलहिरण्यादिदानं॥ तांबू
लसुगंधदानं॥ एकादशाहरम्याबंयावस्त्रानपटदानं॥ देवालयेपाषा
णोवेउपादानदान॥ अन्नपात्रधेनुदानं॥ ततो वैश्वदेवः॥ इति क्रियापद्धतिः॥ ॥
इति नवकुंडिकागतध्वरभाष्ये ब्रोदि इप्रकरणं॥ सपिंडीकरणमाह॥ ॥ ततः सं

वत्सरे पूर्णे त्रिपक्षे द्वादशाहे यदहर्वा वृद्धिरापद्येत चत्वारि पात्राणि सतिलगंधोदका
नि पूरयित्वा त्रीणि पितॄणामेकं प्रेतस्य ।। संवत्सरे पूर्णे सापिंडीकरणं ।। अथ वा त्रिपक्षे
द्वादशाहे वा वृद्धिप्राप्तौ वा कुर्यात् ।। इति चत्वारः पक्षाः दर्शिताः ।। तत्रैवं व्यवस्था ।। द्वा
दशाहे पितुः सपिंडीकरणं साग्निमता कार्यं ।। सपिंडीकरणं विना पिंडपितृयज्ञस्याप्रसि
द्धेः ।। सोग्निकस्तु यदा कर्ता प्रेतो वाप्यग्निमान् भवेत् ।। द्वादशाहेन तत्कार्यं सपिंडीकर
णं पितुरिति वचनात् ।। निरग्निकस्तु त्रिपक्षे वृद्धिप्राप्तौ संवत्सरे वा कुर्यात् ।। यदा
प्राक् संवत्सरात्सपिंडीकरणं तदा षोडशश्राद्धानि कृत्वा सपिंडीकरणं कार्यं पुनः
सपिंडीकरणं कृत्वा स्वकाले तानीति संप्रदायः ।। उभयथापि वचनदर्शनात् ।। श्राद्ध
निषेधकालात् दत्त्वा नैतु कुर्यात्सपिंडनं ।। श्राद्धानि षोडशापाद्य विदधीत सपिंडीनामि
नादिनादारभ्यैकादशाहे विधिवत्स्नात्वा षोडशभिरुपचारैः पूजनपूर्वकं विष्णुं

तर्पणं कुर्यात् ॥ तत्र समंत्रकप्राणायामत्रयं विधाय पूर्ववद्दिक्पूजनं तर्पणं च ॥
इति विष्णुपुराणोक्तं विष्णुतर्पणं ॥ अपयोत्सर्गः ॥ ॥ तच्च देशकालः सपिंडनामि-
ति ॥ षोडशश्राद्धानि च ॥ द्वादशाहे त्रिपक्षे च षण्मासे मासिकाब्दिके ॥ श्राद्धा-
नि षोडशैतानि संस्मृतानि मनिषिभिरिति दर्शितानि ॥ तान्यथा ॥ यस्यापि वत्स-
राद्दर्वाक् सपिंडीकरणं भवेत् ॥ मासिकं चोदकुंभं च देयं तस्यापि वत्सरमिति ॥
तत्र सपिंडीकरणं स्वस्वकाले तानि कर्तव्यानीति प्रथमकल्पः ॥ अप्राप्ति-
कालत्वेन प्रागनधिकारात् ॥ यद्यपि वचनं ॥ षोडशश्राद्धानि कृत्वैव स-
पिंडीकरणं संवत्सरात्प्रागपि कर्तव्यमिति सोयमापत्कल्पः ॥ यदा वापत्क-
ल्पेन प्राक् सचेत्सपिंडीकरणात् प्रेतश्राद्धानि करोति तदैकोद्दिष्टविधानेन
कुर्यात् ॥ यदा तु मुख्यकल्पेन स्वस्वकाल एव तानि करोति तदाब्दिकं येन यथा
करोति पार्वणमेकोद्दिष्टं वा तथा मासिकानि कुर्यात् ॥ सपिंडीकरणादर्वाक् कुर्वन्

श्राद्धानिषोडश॥ एकोद्दिष्टविधानेन कुर्यात्सर्वाणि तानि तु॥ सपिंडीकरणादूर्ध्वं यदा कुर्यात्तदा पुनः॥ प्रत्यब्दं यो यथा कुर्यात्तथा कुर्यात्सुतान्यपि॥ इति स्मरणात्॥ चत्वारि पात्राणि पूरयितेति चतुर्ग्रहणात्रिभ्यः प्रेतस्यासित्वपितामहप्रपितामहेभ्य एव दानं॥ न च षड्दैवत्यापितत्र च त्रीणि पात्राणि पितॄणामेकं प्रेतस्य भवति॥ प्रेतपात्रं पितृपात्रेषु आसिंचति ये समाना इति द्वाभ्यां प्रेतसंबंधिपात्रं गृहीत्वा प्रेतस्य पितृपितामहप्रपितामहपात्रेषु ये समाना इति द्वाभ्यां मंत्राभ्यामासिंचति॥ अस्यासेकमंत्रो भवतः॥ आसेकप्रकारो ब्रह्मपुराणे॥ चतुर्थ्यं श्राद्धपात्रेभ्य एकं वामेन पाणिना॥ गृहीत्वा दक्षिणेनैव पाणिना सतिलोदकं॥ संसृजेच्च तथा न्येष ये समाना इति स्मरन्॥ प्रेतपात्रस्य हस्तेषु चतुर्भागं जलं क्षिपेत्॥ ततः पितामहादिस्तत्तन्मंत्रैस्त्र्य पृथक् पृथगिति वाजसनेयिभिस्तु प्रवंवित्रभ्यो देयं पश्चात्तत्र दाय दानं॥ एतेनैव पिंडो

मध्याप्रेतार्घ्यपात्रस्थं जलं पेसमानाद् पार्श्व्यांमे त्राश्व्यांपात्रत्रये स्थापितं
एवप्रेतपिंडमपित्रेभ्यादत्त्वापिंडत्रयेनिदध्यादिसर्वः॥ततःप्रकारश्चब्रह्म
पुराणे॥दत्त्वापिंडमध्याष्टांगंध्यात्वालवसुभास्वरं॥सुवर्णरौप्यदर्भैस्तुत
स्मिन्पिंडंतत्रिधा॥दत्त्वापितामहादिभ्यः पितृभ्यः प्रेतमर्पयेत॥त
था॥सुवर्तुलांस्ततस्तांस्तुपिंडान्कृत्वाप्रपूजयेत्॥अर्घ्यैःपुष्पैस्तथाधू
पैर्वस्त्रैर्माल्यानुलेपनैरिति॥एतच्चप्रेतश्राद्धसहितंसपिंडीकरणंस
विभक्तधनेषुबहुषुभ्रातृषुसत्स्वप्येकेनैवकृतेनात्यंनसर्वैःकर्तव्यं॥
नवश्राद्धंसपिंडीत्वंश्राद्धान्यपिचषोडश॥एकेनैवतुकार्याणिसविभक्त
धनेष्वपीतिस्मरणात्॥मातुःपिंडदानादौगोत्रेविप्रतिपत्तिःभर्तृगोत्रे
णपितृगोत्रेणवादेयं॥उभयथावचनदर्शनात्॥मातुःसपिंडीकरणे

विरुद्धानि बाध्यानि दृश्यन्ते ॥ तत्रापि पितामह्यादिभिः सह सपिंडीकरणं स्मृतामिति

तथा ॥ भर्त्रापि भार्यायास्तु मात्रादिभिः सह सपिंडीकरणं चर्त्तव्यमिति पैठीनसिराह ॥ अ

पुत्रायां मृतायां तु पतिः कुर्यात्सपिंडताम् ॥ श्वश्र्वादिभिः सहैवास्याः सपिंडीकरणं

वेदनि ॥ पत्यास्त्वसपीडीकरणं यमस्याह पत्या वै केन कर्त्तव्यं सपिंडीकरणं स्त्रि

स्त्रियाः ॥ सा मृतापि हि तेनैकं गता मंत्राकृतिव्रतैमिति ॥ उशनसा न मातामहेन प

ह सपिंडीकरणमुक्तं ॥ पितुः पितामहे यद्वत्पूर्वेस्वेव स्वरेसुतेः ॥ मातुर्मातामहे तद्व

देषां सपिंडतामतेति ॥ एवं विधेषु वचनेषु सत्स्वपुत्रायां भार्यायां प्रमीतायां भर्त्ता

स्वमात्रैव साषिंड्यं कुर्यात् ॥ अत्राचारादनुष्ठानं ॥ अत ऊर्ध्वं प्रेतपात्रे दद्याद्यस्मिन्

हनि प्रेतः स्यात् ॥ अतः सपीडीकरणादूर्ध्वं प्रेतस्यान्नं दद्याद्यस्मिन्नहनि यस्यां तिथौ

प्रेतस्यादित्यर्थः ॥ यद्यप्यत्र प्रेताय सेकवचनानिर्दिष्टं तथापि सम्बत्सरं न रात्रिभ्यो दद्यं ॥

मासश्चात्र चांद्रो ग्राह्यः ॥ यथाह परमेष्ठी ॥ आब्दिके पितृकार्ये च चांद्रो मा
सः प्रशस्यते ॥ विवाहादौ स्मृतः सौरो यज्ञादौ सावनः स्मृतः इति ॥ इति नववंडिश्रा
९ द्धप्रकार आब्दो पंचमी वंडिका ॥ ॥ अथ प्रयोगः ॥ षट्दशाहे विधिवत् स्नात्वा वि
ष्णुपूजनं तिलतोयदानं दशाहेऽन्नमासिकमेकोद्दिष्टं ततः स्नानं ॥ प्रेतोद्देशेन सा
न्नोनां सजलानां दशघटानां दानं ॥ एकादशे जिनोपक्वान्नजलपूरिता
विष्णवे देया ॥ एको धर्मराजाय घटो देयः ॥ एकश्चित्रगुप्ताय ॥ ततो मासिका
नि चतुर्दश श्राद्धानि एकतंत्रेण ॥ तत्र क्रमः ॥ द्वितीयमासे त्रिपक्षे तृतीय
मासे चतुर्थमासे पंचममासे षष्ठे न्यूनषण्मासे सप्तमे अष्टमे नवमे दशमे एका
दशे द्वादशे न्यूनाब्दे वेति प्रेतैकोद्दिष्टवत्कार्याणि ॥ ततः स्नानं कुर्यात् ॥ ततः
सपिंडीकरणं ॥ तत्र पूर्वं वैश्वदेवपादप्रक्षालनं ॥ ततः पार्वणं प्रेतस्य पितृपि

तामहप्रपितामहानां सदर्थत्रयाणां पादप्रक्षालनं ॥ तत्र सर्वे पार्वणं पार्वणवत् ॥ एकोद्दि-
ष्टे एकोद्दिष्टवत् ॥ अत्राद्य मासे पक्षे तिथौ अमुकगोत्रस्यामुकप्रेतस्या वसुरुद्रादित्य-
लोकप्राप्त्यर्थं प्रेतत्वनिवृत्त्यर्थं अमुकगोत्राणां प्रेतस्य पितृपितामहप्रपितामहानां अ-
मुकशर्मणां ॥ वैश्वदेवपूर्वकं एकोद्दिष्टं पार्वणविधिना सपिंडीकरणश्राद्धं पु-
ष्पद्रव्येयाहं करिष्ये ॥ आसनं आवाहनं विश्वेषां देवानां पितृणां प्रेतस्य च
अर्घपात्राणि पूरयित्वा पश्चाद्विश्वेभ्यो देवेभ्योऽर्घं दत्वा ततः प्रेताय जलं
प्रेतपात्रे जलं चतुर्थभागेनार्घं दत्वावशिष्टं वशिष्टमर्घपात्रस्थितं जलं
पात्रादि पात्रेषु विभज्य ततीयां त्रीनिनयेत् ॥ तत्र प्रेतपात्रं पितृपात्रेषु सं-
योजयिष्य इति पृष्ट्वा संयोजयेत्यनुज्ञातोऽर्घं संयोजयेत् ॥ एवं पिंडयोजने
पयनुज्ञाप्रार्थनं ॥ तत्रे मौ येसमाना इति मंत्रद्वयं पठित्वा ततः अमुकसगोत्र

स्यामुक प्रेतस्यार्घ्यः ॥ अमुकगोत्रस्य प्रेतस्य पितुरमुकशर्मणो र्घ्येण सह
संयुज्यतां ॥ वसुलोक प्राप्तिरस्त्विति वदेत् ॥ एवं पितामहपात्रे प्रपितामह
पात्रे च ॥ ततस्तेभ्यो र्घ्यं दद्यात् ॥ पार्वणे नियमेन विकार्यपिंडदाने पूर्वपा
र्वणासंबंधिनः पिंडान्निरूप्य पश्चात्प्रेतपिंडं त्रेधा विभज्य ततः आद्यं
भागमाद्याय येसमाना इति मंत्रद्वयं पठित्वा ॥ अमुकगोत्रस्यामुकप्रे
तस्य पिंड अमुकगोत्रस्य प्रेतस्य पितुरमुकशर्मणः पिंडेन सह संयुज्य
तामिति कृत्वा प्रथमं पिंडं दद्यात् प्रथमं पिंडं वर्तुलं कुर्यात् ॥ ततो वसुलो
क प्राप्तिरस्त्विति वदेत् ॥ एवमितराभ्यां पिंडाभ्यां संयोजने ॥ अनंतरं
रुद्रलोक प्राप्तिरस्तु ॥ आदित्यलोक प्राप्तिरस्तु ॥ इति यथाक्रमं वदेत् ॥ अ
त ऊर्ध्वं अत्रपितर इति जपादि ॥ पूजनानंतरं पिंडानामिमं त्रयं वदेत् ॥

दय वो नु गतः प्रेतः पितरस्तं दधामि वः॥ शिवमस्त्विति ब्राह्मणानां जायतां चिरजीवितं॥ समानी
व आकूतीनि समाना हृदयानि वः॥ समानमस्तु वो मनो यथा वः सुसहासती॥ अत्र एवं प्रेतश
ब्दो नोच्चार्यः॥ अक्षय्यादिषु॥ श्राद्धं समाप्य मोक्षधेनुसंकल्पः॥ इति नवकण्डिकागदाधरभा
ष्ये सपिंडीकरणप्रयोगः॥ ॥ वृद्धिश्राद्धमाह॥ आभ्युदयिके प्रदक्षिणमुपचारः॥ पुत्रजन्म
विवाहादौ आभ्युदयेय श्राद्धं तदाभ्युदयिकं श्राद्धं नोच्यते॥ तत्र प्रदक्षिणमुपचारः॥ प्रद
क्षिणग्रहणे नयज्ञोपवीतिना प्राक्संस्थं उदक्संस्थं वा प्राङ्मुखेन वा कार्यमिति ज्ञा
प्यते॥ शातातपः॥ अनिष्ट्वा पितृयज्ञेन वैदिकं किंचिदाचरेत्॥ तत्रापि मातरः पूर्वं पूज
नीयाः प्रयत्नतः॥ अकृत्वा मातृयागं तु वैदिकं यः समाचरेत्॥ तस्य क्रोधसमाविष्टा
हिंसामिच्छंति मातरस्ततः॥ मातृगणस्तु भविष्यपुराणे निरूपितः॥ गौरी पद्मा शची
मेधा सावित्री विजया जया॥ देवसेना स्वधा स्वाहा मातरो लोकमातरः॥ धृतिः पु
ष्टिः स्तथा तुष्टिरात्मदेवतया सह॥ विष्णुपुराणे॥ कन्यापुत्रविवाहेषु प्रवेशे नववेश्मनि

६४

शुभकर्मणि बालानां चूडाकर्मणि केनथा॥ सीमंतोनयने चैव पुत्रादिमुखदर्शने॥ नांदीमुखा
सितृनादौ तर्पयेत्प्रयतो गृहाभिति॥ आश्वालिः॥ यज्ञो द्वाहेप्रतिष्ठासु मेखलाबंधमोक्षयोः॥
पुत्रजन्मवृषोत्सर्गे वृद्धिश्राद्धं समाचरेत्॥ मातुश्राद्धं तु पूर्वस्यात्पितॄणां तदनंतरं॥ ततो
मातामहानां च वृद्धौश्राद्धत्रयं स्मृतमिति॥ वैदिककर्मसु प्रतिप्रयोगं श्राद्धं कृत्तिप्रसक्तौ
कात्यायनः॥ असकृद्यानि कर्माणि क्रियेरन्कर्मकारिभिः॥ प्रतिप्रयोगनैताः स्युर्मा
तरः श्राद्धमेव चेति॥ सत्यपि वैदिककर्मत्वे ष्टकादिषु नश्राद्धं कर्तव्यमित्याह कात्या
यनः॥ नाष्टकासु भवेच्छ्राद्धं नश्राद्धे श्राद्धमिष्यते॥ नसोष्यंती जातकर्म प्रोषिता
गतकर्मसु॥ पूर्वाण्हे॥ एतदाभ्युदयिकं पूर्वाण्हे भवति नापराह्णे॥ पुत्रजन्मादौ तत्का
ल एव॥ पित्र्यमंत्रवर्ज जपः॥ अयं चाश्वलायनो जपः॥ स निषिध्यते॥ न स्वायंतु न इ
त्ययं॥ उदीरतां त्रयो स्त्राचं पित्र्यामिति पित्र्यमंत्र संस्तानस्ये वश्रव…॥ ऋजवो दर्भा॥

अत्र ऋजवो दर्भा भवंति न हि द्विगुणाः ॥ ॥ यवैस्तिलार्थाः ॥ अत्र तिलार्थाः सर्वे
यवैः कार्याः तदत्र मंत्रोपि यवोसीत्यूहः कार्यः ॥ मुख्यद्रव्याभिधायकत्वात् ॥
संपन्नमिति तत्र हि प्रश्नः ॥ न स्यात्स्यपोति पृच्छती कर्तृं तत्र न स्ताः स्य स्य स्था-
ने संपन्नमिति सर्वे प्रश्नो भवति ॥ तथा च छंदोगपरिशिष्टे ॥ संपन्नमिति तृप्ताः
स्थ प्रश्नस्थाने विधीयते संपन्नमितीतरे ब्रूयुः ॥ सुसंपन्नमिति प्रोक्ते शे-
षमन्नं निवेदयेदिति ॥ दध्यवदराक्षतमिश्राः पिंडाः ॥ दध्याबदरीफलैरक्ष-
तैश्च मिश्राः पिंडा अत्र देयाः ॥ नांदीमुखान्पितॄन्नावाहयिष्य इति पृच्छति
आवाहयेत्यनुज्ञातः ॥ नांदीमुखान्पितॄन्नावाहयिष्य इत्यस्य स्थाने नांदीमुखानिहनावा-
हयिष्य इत्ययं प्रश्नो भवति ॥ नांदीमुखाः पितरः प्रीयंतामिति अक्षय्यस्था-
ने प्रयोगो भवति इति शेषः ॥ नांदीमुखाः पितॄन्नावाहयिष्य इति पृच्छति ॥

ह

पितृन्वाचयिष्यै इत्यस्यस्थाने इत्यर्थः॥ ॥वाच्यतामित्यनुज्ञातो नांदीमुखाः पितरः पितामहाः प्रपितामहा मातामहाः प्रमातामहा वृद्धप्रमातामहाश्च प्रियंतामिति॥ द्वितीये वाच्यतामित्यनुज्ञातो नांदीमुखाः पितर इत्यादि प्रीयंतामित्यत्र पठेत्॥ न स्वसीं प्रयुंजीत॥ सव्यो अपसव्यं न कुर्यादित्यर्थः॥ युग्मानाशयेदत्र॥ अत्रास्मिन्नाभ्युदयिके युग्मान् ब्राह्मणान् आशयेत्॥ भोजयेदित्यर्थः॥ इति नववृद्धि श्राद्धाध्वर भाष्ये षष्ठी कंडिका॥

अथ प्रयोगः॥ तत्र पूर्वेद्युः कालोस्मत्रास्त्र मुक्त निमित्तं मातृपूजनपूर्वकं चवसोर्धारापूर्वकं च नांदीश्राद्धमहं करिष्ये॥ इति संकल्प्य॥ ततः क्षालितैः शुक्लतंडुलैः पीठस्योपरि गौर्यादि षोडशमातरः स्थापयेत्॥ तद्यथा ॐ गणपतिं स्थापयामि॥ एवं गौरीं स्थापयामि॥ पद्मां स्थापयामि शचीं स्थापयामि॥ मेधां स्थापयामि॥ सावित्रीं स्थापयामि॥ विजयां स्थापयामि॥ जयां स्थापयामि॥ देवसेनां स्थापयामि॥ स्वधां स्थापयामि॥ स्वाहां स्थापयामि॥ मातृः स्थापयामि॥ लोकमातृ

धृतिं स्था० पुष्टिं० तुष्टिं० आत्मकुलस्य देवतास्था० ततः मनोजूतिरिति प्रतिष्ठापनं ॥ ततः
पूजा ॥ गणपतिसहिताः चतुर्दशमातृभ्यः ॥ गंधं समर्पयामि ॥ धूपं दीपं नैवेद्यं तांबूलं
दक्षिणां सं० ॥ गणपतिसहितानां चतुर्दशमातृणां पूजनं वि० यन्यूनं यदतिरिक्तं
तत्सर्वं परिपूर्णमस्तु ॥ इति मातृपूजनं ॥ अथ वसोर्धारा ॥ द्रवीभूतं घृतं गेहे दत्त्वा ॥ कुड्या
दिषु वसोः पवित्रमसीति धाराः पंच सप्त वा उत्तरसंस्थाः कुर्यात् ॥ मनोज्योतिरि
ति प्रतिष्ठा ॥ ततो वसोर्धारादेवताभ्यो नमः इति पंचोपचारैः संपूजयेत् ॥ इति वसो
र्धाराकरणं ॥ अथ नांदीश्राद्धं ॥ तच्च यथाकुलदेशाचारेण सपिंडकमपिंडकं वा कु
र्यात् ॥ तदुक्तं भविष्यपुराणे ॥ पिंडनिर्वपनं कुर्यात् न कुर्याद्वा द्विजसत्तम [illegible] ॥ [illegible]
कुलाचारदेशकालाद्यपेक्षया ॥ अपिंडके अग्नौकरणादीनामपि निषेधः ॥ तथा हि ॥
अग्नौकरणमर्घ्यं चावाहनं चावनेजनं पिंडश्राद्धे प्रकुर्वीत पिंडहीने निवर्तते ॥ पिंडनि
र्वापरहितं यच्छ्राद्धं विधीयते ॥ स्वधावाचनलोपोऽस्ति विकरस्तु न लुप्यते ॥ अक्षय्य

१८

पाद्यं

दक्षिणास्वस्ति सोमनसस्य यथाश्चितिमिति ॥ तत्र सपिंडकमाभ्युदयिके लिख्यते ॥
आचमनं ॥ प्राणायामं ॥ वैश्वदेवार्थे मात्राद्यर्थे पित्राद्यर्थे सपत्नीक मातामहार्थे च द्वौ
द्वौ विप्रौ युग्मा शक्तितो भोज्याः ॥ अनुज्ञा ऋजवो दर्भाः यज्ञोपवीति प्रा‍ङ्मुखो दद्यात् ॥
तिलार्थे यवाः ॥ नांदीमुखाः सत्यवसु संज्ञिका विश्वेदेवाः एतद्वः पाद्यं पादावनेजनं
पादप्रक्षालनं ॥ एवमर्घः ॥ इदमन्नं ॥ चंदनं च पुष्पं ॥ अमुकगोत्राः नांदीमुखी मातृपि
तामही प्रपितामह्यः एतद्वः पाद्यं पादावनेजनं ॥ पादप्रक्षालनं ॥ पादप्रक्षालनं ॥ एवमर्
घः ॥ इदमन्नं चंदनं पुष्पं ॥ अमुकसगोत्राः पितृपितामहप्रपितामहाः नांदीमुखाः युग्मरू
पाः एतद्वः पाद्यं पादावनेजनं पादप्रक्षालनं ॥ एवमर्घः इदमन्नं चंदनं पुष्पं ॥ अमुकगो
त्राः मातामह प्रमातामह वृद्धप्रमातामहाः नांदीमुखाः युग्मरूपाः एतद्वः पाद्यमित्या
दि ॥ ततः आचमनं ॥ दिग्बंधनं ॥ अग्निष्वात्ताः पितृगणाः प्राचीं रक्षंतु मे दिशं ॥ तथा
बर्हिषदः पांतु याम्यां ये पितरस्तथा ॥ प्रतीचीमाज्यपास्तद्वदुदीचीमपि सोमपाः ॥

उर्ध्वं तत्स्वयमारक्षेत् कव्यावाक नक्षोयध्य ॥ रक्षोभूतपिशाचेभ्योस्त्वथैवाप्सर
देवता ॥ सर्वतश्चाधिपस्तेषां यमे रक्षां करोतु मे ॥ लीलार क्षत्वमसुरानृदर्भो रक्षं
तु राक्षसान् ॥ पंक्तिं वैश्रोत्रियो रक्षोहतिर्भिः सर्वरक्षकः ॥ निहन्मि सर्वं यदमे
ध्यति नीवीबंधनं कुर्यात् ॥ श्राद्धमौनयामि सारभ्य गायत्र्ये नमः संतं पठे
त् ॥ ततः कुर्मार्घ्यं तुलसी मिमंत्रं पं ॥ यद्देवा इति च च्येन ॥ ततः पात्रप्रोक्षणं ॥ दु
ष्टदृष्ट्यादि स्पृष्ट संपर्कदोषाः पाकादीनां पवित्रतास्त्विति देशकालपात्र
द्रव्य श्राद्धाः संपदस्तु ॥ अद्येत्यादि देशकालौ स्मृत्वा ॰ अमुकसगोत्राणां
पितृपितामहप्रपितामहानां नांदीमुखानां पुरूरवा रूपाणां तथा अमुक
गोत्राणां मातामहप्रमातामहवृद्धप्रमातामहानां नांदीमुखानां पुरूरवा
रूपाणां पार्वणश्राद्धविधिना आभ्युदयिकश्राद्धमहं करिष्ये ॥ स सवस्तु

मुखाना वाहयिष्ये। आवा॰ आवाहनादि कीरणजपाः पूर्ववत्॥ तत्रार्घ्यं करणं॥ शंनो देवीरभि
ने ना। तत्रस्तिलाः पवनं॥ यवोसि सोमदेवत्येति॥ इदमक्षयं दत्तं पुष्पं। अर्घ्यं गृहीत्वा ये
दिव्या इति मंत्रेण सत्यवसुसंज्ञिकाः एषवोअर्घ्य इति दद्यात्॥ यादिव्या इति पठित्वा॥ अ
मुकगोत्रे मातृपि॰ एषते र्घः एवं सर्वत्र। अमुकगोत्र पितृपितामहप्रपितामहाः नांदी
मुखाः एषवोर्घः॥ गोत्रो मातामहप्रमातामहाः एषवोर्घः॥ प्रथमे पात्रे संस्रवान् सम
वनीय पितृभ्यः स्थानमसीति न्युब्जं पात्रं करोति॥ ततो गंधपुष्पधूपदीपवाससां
प्रदानं॥ सत्यवसुसंज्ञकेभ्यो विश्वेभ्यो देवेभ्यः स्वाहेति दत्वा॥ गोत्राभ्यो मातृपिता
महीप्रपितामहीभ्यो नांदीमुखीभ्यो यथा दत्तं गंधाद्यर्चनं॥ गोत्रेभ्यः पितृपितामह
प्रपितामहेभ्यो नांदीमुखेभ्यो यथादत्तं॥ गोत्रेभ्यो मातामहप्रमातामहवृद्धप्रमा
तामहेभ्यो नांदीमुखेभ्यो यथादत्तं गंधाद्यर्चनं॥ आचमनं॥ उद्धृत्य घृताक्तम
न्नं पृच्छत्यग्नौ करिष्य इति॥ कुरुष्वेत्यनुज्ञातः। ततो मेक्षणेनाहुतीर्जुहोति।

(52)

अग्नये कव्यवाहनाय स्वाहा ॥ सोमाय पितृमते स्वाहा ॥ अग्निदग्धिकस्तु विप्रपाणौ जलेवा
कुर्यात् ॥ हुतशेषं दत्वा पात्रमालभ्य जपति ॥ पृथिवी ते पात्रं द्यौरपिधानं ब्राह्मणस्य
मुखे अमृते अमृतं जुहोमि स्वाहा ॥ इदं विष्णुः सुरे ॥ इत्यंगुष्ठमन्त्रे वगाह्य ॥ ए
वं सर्वत्र ॥ ततः अपहता इति यवान् विकीर्य ॥ ॥ उष्णं स्विष्टमन्नं दद्यात्तेभ्यो
वा ॥ ततः पित्र्य मंत्र वर्जं जपः ॥ अन्नप्रकीरणं ॥ आचमनं ॥ सकृत्सकृद्ब्राह्मणेभ्यः उ
दकदानं ॥ ततः प्रणवं गायत्री ॥ मधुवाता इत्यृच यः पठेत् ॥ नांदीमुखा देवाः तृप्ता
स्थ ॥ तृप्ताःस्म इति प्रतिवचनं ॥ मात्रादिस्थाने ब्राह्मणाः तृप्ताःस्थ ॥ तृप्ताःस्म इति स
र्वे प्रब्रूयुः ॥ एवं सर्वत्र ॥ तृप्ताःस्म इति प्रतिवचनं ॥ शेषमन्यमप्यस्ति ॥ इष्टैः सह
भुंज्यतां ॥ ततः आचांतेषु विप्रेषु ॥ अपहता इत्युच्छिष्ट समीपे प्रतिपार्वणं उल्ले
खनं कृत्वा ॥ उदकस्पर्शनं ॥ साग्निकस्योल्मुकनिधानं ॥ अवनेजनं ॥ सकृदाच्छि

न्नास्यास्तरणं॥ तदुपरि पिंडदानं॥ अत्र पितर र स्रक्का॥ उदङ्मुख आस्ताः॥ आ
तमनात्॥ आवृत्यामीमदंतेति जपः॥ ततः अवनेजनं॥ नीवीविसर्गः॥ नमो व
इति षडंजलिकरणं॥ घोरसूत्र वर्जं॥ एतद्व इति सूत्रदानं॥ पिंडानामभ्य
र्चनादि नैवेद्यांतं॥ आचमनं॥ ततोस्तुप्रोक्षितास्त्वक्षय्यमिस्त्वं दूंनिषेसां
तं॥ पात्रोत्तारैनकरणं॥ ततो दक्षिणादानादि गृहप्रवेशनांतं॥ इति न
वकंडिका गदाधरभाष्ये आभ्युदयिकश्राद्धप्रयोगः॥ ॥ अथ तृप्तिरुच्यते
इति शेषः॥ ॥ ग्राम्याभिरोषधीभिर्मासं तृप्तः॥ पितॄणामिति शेषः॥ ताश्च
यवव्रीहिमाषतिलाः॥ मनुः॥ तिलैर्व्रीहियवैर्माषैरद्भिर्मूलफलेन वा॥ द
त्तेन मासं प्रीयंते विध्विवत्पितरो नृणामिति॥ ॥ तदभावे आरण्याभिः॥ मा
सं तृप्तिरिति वर्त्तते॥ ग्राम्याणांमभावे आरण्याभिः श्यामाकनीवाराद्याभिः॥
मूलफलैरोषधीभिर्वा स्वपक्षमेतद्॥ सहान्नेनोत्तरास्तर्पयंति॥ उत्तरा अन्ने

53

वक्ष्यमाणाः पदार्थाश्छागादि वा धेनुणसोंता सर्वे अन्नेन मूलफलौषधीभिः
सह दत्तास्तर्पयंतीत्यर्थः ॥ न लुब्ध्येव लाः ॥ ॥छागो स्त्रमेष नीलश्च श्रौ चाल्प
ब्धायन स्वयं मत्तानाहृत्य पचेत ॥ ॥छागो दुस्त्रो बलिवर्धः ॥ स्त्रमेषा
नां मध्ये न्यतमम न्नेन सह ऋयेणागृहीत्वा ॥ अथवा ॥ लब्धावानीय
पितृन्नूतर्पयेत ॥ न तु स्वयं मत्तानानाहरणं ॥ ॥मासद्वयं तु मत्स्यमासत्र
यं तु हारिणेन चतुर औरभ्रेण पंच शाकुनेन षट् छागेन सप्त क्रो
मेणाष्टौ वाराहेणा नव मेषमांसेन दश माहिषेण कादश पार्षतेन
संवत्सरं तु गव्येन पयसा पायसेन वा वाध्रीणसमांसेन द्वादश व
र्षाणि ॥ ॥पाठीनादयो मत्स्याः ॥ हरिणादयो मृगाः ॥ औरभ्र आर
ण्यो मेषाः ॥ शाकुनः पक्षी सोप्यान्नेयो ग्राह्यः ॥ मेषश्चित्रमृगः ॥ वाध्री

न सोनिगमोक्ताः॥ त्रिपिबं हिंद्रियक्षीणं श्वेतं वृद्धमजापतिः॥ वार्ध्रीणसस्तु तं प्राहुर्या
ज्ञिकाः पितृकर्मणीति॥ त्रिपिबमित्युदकपान समये मुखं कर्णद्वयं चोदकमध्ये पत
तीति त्रिपिबः॥ ॥ इति नवकंडिका गदाधरभाष्ये सप्तमी कंडिका॥ ७॥ ॥
अथाक्षय्यतृप्तिः॥ उच्यत इतीति शेषः॥ अक्षय्यतृप्तिः कथं॥ किंच॥ अक्षय्यकृं
द्रव्यमित्यत आह॥ खड्गमांसं कालशाकं लोहच्छागमांसं॥ [illegible] धान्यभुः
खड्गः॥ रक्तश्छागो लोहच्छागः॥ मधु महाशल्को॥ मत्स्यविशेषः॥ ॥ वर्षासु च म
घाश्राद्धं हस्तिछायायां च॥ आहृत्य सिकरमिति शेषः॥ मंत्राध्यायीनः एताः श्रा
रयाध्यायी षडंगविज्ज्येष्ठसामगो यत्री सारमात्रो पि पंचाग्निः स्नातकश्च त्री
णाचिकेतस्त्री मधुस्त्री सुपर्णः द्रोणपाठको ब्राह्मोन्नपुत्रो वागीश्च सोयात्रिकश्च
नियोज्याः॥ एते मंत्राध्यायी मुख्यास्तद्याज्ञिकोनोस्ते सर्वे पंक्तिपावनाः श्राद्धे
नियोज्याः एतेषां नियोजनेन पितॄणामक्षय्यतृप्तिरित्यर्थः॥ मंत्राध्यायिनः॥

पूता आचरणेनपूताः षडंगवित्‌॥ शिक्षाकल्पादीनामर्थतोग्रंथतश्चवेत्ता॥ ज्येष्ठ
साम्नः संततगाता ज्येष्ठसामगः॥ अथज्येष्ठसामच्छंदोगानांव्रतानि सामानि
च तद्योगाज्येष्ठसामगः॥ गार्हपत्यदक्षिणाग्न्याहवनीयसभ्यावसथ्याग्निमा
न्पंचाग्निः॥ त्रिणाचिकेतः॥ अध्वर्युवेदभागस्तद्‌व्रतं च तदुक्तं यं योधिते यश्च करो
ति सोपि तद्योगात्त्रिणाचिकेतः॥ त्रिमधुःऋग्वेदैकदेशः॥ तदधीते तद्‌व्रतं चरति यः
सत्रिमधुः॥ त्रिसुपर्णः अध्वर्युवेदभागस्यार्थतोग्रंथतश्चाध्येता॥ ब्रोणपाठको
धर्मशास्त्रपाठकः॥ ब्राह्मोढापुत्रः ब्राह्मविवाहपरिणीतापुत्रः॥ यागोश्च सोवि
द्वान्‌॥ अभावेप्येकः॥ वेदविदर्पंक्तेः न्रुदुर्निनिर्भुंज्यात्तासहस्रात्‌खंपंक्तीः पुनातीति
वचनात्‌॥ ॥ इति नवकंडिकागदाधरभाष्ये अष्टमीकंडीका॥ ८॥ ॥अ
थकाम्यानि भवंति स्त्रियो प्रतिरूपाः प्रतिपदोन्द्वितीयायां॥१॥ स्त्रीअन्या भ्यास्त्व

तीयायांच चतुर्थ्यां क्षुद्रपशवः पुत्राः पंचम्यां घृतर्द्धिः षष्ठ्यां कृषिः सप्तम्यां वाणिज्य
मष्टम्यामेकशफं नवम्यां दशम्यां गावः परिचारकाः एकादश्यां धनधान्यानि द्वा
दश्यां कुप्यं हिरण्यं ज्ञातिश्रैष्ठ्यं च त्रयोदश्यां युवानस्तत्र । म्रियते शस्त्रहतस्य
चतुर्दश्याममावास्यायां सर्वमित्यमावास्यायां सर्वमिति ॥ ॥ प्रतिपदाद
यश्च कृष्णपक्ष आः । स्त्री जन्म कन्या द्वयः क्षुद्रपशवः । अजादयः । कृषिः कृषिफ
लं । वाणिज्यं वाणिज्यफलं । एकशफा अश्वेतरादयः । अश्वानां तु तीयाम
त्रिधानामत्र । परिचारकाः दास्यादयः । कुप्यं वर्णरूप्यव्यतिरिक्तं ताम्रादि ॥
॥ युवानां त्वं त्रयोदश्यां श्राद्धं देयं । शस्त्रहतस्तेन जलादिहतत्रिंशादुर्मर
णेन मृतानामुपलक्षयति । प्रतिपदादितिथिषु विहितानि यानि फलानि तेषु
तु स्वीयमनसोऽभीष्टान् सर्वान् कामानमावास्यायां श्राद्धदः प्राप्नोति । अत्र य
द्यपि सर्वकामप्राप्तिरिति शेषेण कथिता तथापि न युगपत्सर्वकामनाप्राप्तिः ॥

५८

अपितु श्र्यमावास्यायामनुष्ठिते न श्राद्धेनैकेनेककामप्राप्तिः॥ एवममावास्यांतरानु
ष्ठितेनान्येन श्राद्धेनान्यः काम इति॥ ॥ इति श्रिरग्निचित्संम्राट्स्थपती श्री मह
याज्ञिकवामनात्मज दीक्षितगदाधरकृते कातीयश्राद्धसूत्रे भाष्ये नवमीकंडि
का॥९॥ ॥शुभमस्तु॥ शाके १७१८ वर्षे नळनामसंवत्सरे आश्विन वद्य ५ भृगु
वासरे तद्दिने तुतीयप्रहरे दिवास मास्सनवकंडिका भाष्यः॥ ॥५८॥ ॥५॥